सिद्धान्तः सेव्यते सद्भिः शक्तिपातपवित्रितैः ।
कामकारितयान्यैस्तु निन्द्यंते पशुशास्त्रवत् ॥

एतदेव शक्तिपातचिह्नत्वेनोक्तम् । श्रीमन्मृगेन्द्रे 'येषां शरीरिणां शक्तिः पतत्यविनिवृत्तये । तेषां तल्लिङ्गमौत्सुक्यं

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

मुक्तौ द्वेषो भवस्थितौ । भक्तिश्च शिवभक्तेषु श्रद्धा तच्छास्त्रके विधौ' इति । ततश्च शक्तिपातानन्तरभाविन्या दीक्षया पवित्रितैः शोधितैः सिद्धान्तः सेव्यते । यदुक्तम् श्रीमत्किरणे । तीव्रशक्तिनिपातेन गुरुणा दीक्षितो यदा । सर्वज्ञः स शिवो यद्वत् । इति ॥ १२ ॥

अस्य च पशुजननिन्दया न प्रामाण्यव्याहतिरस्तीति दृष्टान्तेनाह—

न हि कस्तूरिकामोदः पुरुषैः प्रतिहन्यते ।
हेतुभिः साध्यते किं तु धन्यैराघ्रायते सदा ॥

तदीयदीक्षाद्युपयोगितया शिवादिपरिज्ञानं भोगमोक्षार्थिभिः कार्यम् । तज्ज्ञानं च सिद्धान्ताभ्यासेन तदभ्यासश्च शक्तिपाताविनाभाविन्या दीक्षया सिध्यतीत्युक्तम् ॥ १३ ॥

अत्र केचिदाहुः । किमनेनासत्यभूतेन शिवादिवस्तुकथनेन तत्परिज्ञानसाधनकथनेन वा । सर्वं खल्विदं ब्रह्म । एको वशी सर्वभूतान्तरात्मेत्यादिश्रुतिभिः परमात्मैव चिदाकारः सत्यभूतः स एव शिवादिशब्दवाच्यो नान्यत्किञ्चिदस्ति ततः परमानन्दस्वरूपस्य तस्य यथावदवबोध एव मोक्षहेतुरिति तान्प्रत्याह—

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

वेदान्तैश्च कुलाम्नायैस्तथान्यैः प्रतिपाद्यते ।
आनन्दविप्रलब्धानामानन्दोपहिताचितिः ॥

यदेतद्वेदान्तादिशास्त्रैरन्यैश्च शाक्तादिभिश्चितिश्चैतन्यात्मकमेव वस्तु पारमार्थिकं तस्याश्चितेरानन्दोपहितायाः परमानन्दस्वरूपायाः अवबोध एव मोक्षहेतुरिति प्रतिपाद्यते । तदानन्दविप्रलब्धानां आनन्दं ब्रह्मेति श्रुतिगतस्यानन्दशब्दस्य परिपूर्णतार्थस्य सुखार्थताभ्रान्त्या विप्रलब्धानां अपरिणतमलानामेव शोभते । नान्येषां अस्मदादीनां शिवानुगृहीतानामिति भावः । तथा ह्यात्मैकत्वं तावत्साधयितुमशक्यं अनेकत्वप्रतिपादकानां श्रुतीनां सम्भवात् । एकत्वश्रुतीनामन्यपरत्वादनेकत्वज्ञापकस्य दृश्यमानस्य जननमरणादिप्रतिनियमस्यानपह्नवनीयत्वाच्च । तेषां चात्मनामस्वातन्त्र्यस्य दर्शनात् बद्धत्वे सति तेषां भोगमोक्षकर्ता शिवस्तदुपादानादयश्चागमेनानुमानेन सिद्धा इत्यादिविस्तरेणास्माभिर्मृगेन्द्रवृत्तिदीपिकायां दर्शितं साधितञ्च रामकण्ठादिभिर्मतङ्गवृत्त्यादाविति ततोऽवधार्यम् । ग्रन्थविस्तरभयान्नात्र प्रपञ्च्यते ॥ १४ ॥

अत एवात्मविषयं विज्ञानमपि तत्तच्छास्त्रप्रसक्तानां यथावन्न संभवतीत्याह—

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

**चिन्महोदधिगाम्भीर्यमवसीयेत सूरिभिः ।
अवगाह्य परानन्दलहरीं यदि नोत्क्षिपेत् ॥**

यदि हि प्रोक्तवत्परमानन्दभ्रान्तिकल्लोलस्ता नोत्क्षिपति ततो विद्वद्भिश्चिन्महोदधेरात्मवर्गसमुद्रस्य गाम्भीर्यं सर्वज्ञत्वसर्वकर्तृत्वात्मस्वरूपं नित्यत्वव्यापकत्वानेकत्वादि चावगाह्य प्रमाणैर्विषयीकृत्यावसीयेत । नान्यथा । तत्तच्छास्त्रकर्तृणामसर्वज्ञत्वात्तद्वचनादेतन्न संभवतीत्यर्थः ॥ १५ ॥

कुतः पुनरेतज्ज्ञायते अत आह —

**तदत्र कथितं सर्वस्रोतसां ज्यायसि प्रभोः ।
उदक्षेणोर्ध्ववक्त्रेण ततस्तदवधारयेत् ॥ १६ ॥**

तच्चात्मस्वरूपं वामादिसमस्तशास्त्रस्रोतसां मध्यादुत्कृष्टे सिद्धान्ताख्ये स्रोतसि कथितमिति तत एवावधार्यम् । शिवकृतत्वेन ज्यायस्त्वमेवास्य साधयति । प्रभोरुदक्षेणोर्ध्ववक्त्रेणेति । कथितमिति । वक्त्रशब्देन वचनत्राणरूपा शक्तिरुच्यते परमार्थतः शिवस्य देहाभावात् । अतश्चोदक्षेणोदङ्मुखेनानुग्रहप्रवृत्तेनोर्ध्वस्थितेन च शक्त्यात्मना वक्त्रेण बिन्दुशक्तेर्नादादिक्रमेणोत्पादिते शास्त्रे प्रकाशितमित्यर्थः । नन्वशरीरस्य शास्त्रोपदेशानुपपत्तिः । तन्न । जगत्सृष्ट्यादिवत्सङ्कल्पमात्रेण विद्येश्वरादीनां शास्त्रावबोधकत्वात् ॥ १६ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

किञ्च ।

हेतूनपि परीक्षार्थं लक्षयेत्तस्य शास्त्रतः ।
नह्यत्र शेमुषी शुद्धा विपुलापि प्रगल्भते ॥

तस्यात्मस्वरूपस्य परीक्षणमपि सिद्धान्तोक्तैरेव हेतुभिः कार्यमिति भावः ॥ १७ ॥

इत्थं प्रसङ्गादात्मस्वरूपस्य सिद्धान्तैकगम्यत्वं प्रसाध्य प्रकृतानां शिवादिरत्नानां श्रवणमनननिदिध्यासनानि सिद्धान्तादेवेति प्रागुक्तं प्रपञ्चयति—

अलौकिकानि सूक्ष्माणि गोपितानि शिवेन च ।
त्रीणि रत्नानि को वेत्ति सिद्धान्तेन विना स्वयम् ॥

हेतूनपि कुतर्कान्धतमसारीन्मनीषया ।
तद्वद्योगश्च को वेत्ति सबीजाबीजलक्षणम् ॥

तत्र सबीजयोगः सदाशिवाद्याकारः सकलविषयः । निर्बीजस्तु निष्कलविषयः । अनेनैषामागमानुमानयोगिप्रत्यक्षगम्यत्वमपि दर्शयति ॥ १९ ॥

अपि च ।

सिद्धान्तः सेवितः सद्भिरपि कामान्प्रयच्छति ।
सर्वान्साधकचित्तस्थानाशश्चिन्तामणिर्यथा ॥

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

सिद्धान्तादेव साधकानां तत्तत्सिद्धसाधनज्ञानं तदनुष्ठा-नात् फलावाप्तिश्चेत्यर्थः ॥ २० ॥

इत्थं सिद्धान्तज्ञानफलं प्रदर्श्य तदभिधेयार्थप्रकाशकत्वात् अस्यापि प्रकरणस्य तदेव प्रयोजनमिति सूचयन् अभिधेय-परीक्षां प्रतिजानीते ।

तमासेव्य मयाप्येषा बिन्दुशक्तिशिवाश्रया ।
परीक्षा क्रियते तत्र बिन्दुरादौ निरूप्यते ॥

तत्र बिन्दुसिद्धिमाह—

जायतेऽध्वा यतश्शुद्धो वर्तते यत्र लीयते ।
स बिन्दुः परनादाख्यः नादबिन्द्वर्णकारणम् ॥

वक्ष्यमाणवद्विचित्रभुवनादिरूपत्वेन शुद्धाध्वनः कार्यत्वा-त्तदुपादानं बिन्दुः सिध्यति किं च शब्दोपादानतयापि तस्य सिद्धिरित्याह । **नादबिन्द्वर्णकारणमिति** । तत्र नादो नामाभिधेयबुद्धिहेतुः बिन्दोः प्रथमप्रसररूपः सूक्ष्मः नादः चिन्तया रहितत्वेन श्रीमत्कालोत्तराद्युक्तः । बिन्दुश्च तत्कार्यः मयूराण्डरसबिन्दुवदव्यपदेश्यः परामर्शज्ञानरूपः अक्षरबि-न्दुः तत्रैव सूक्ष्मत्वेनोक्तः अर्णश्च वर्णः । आकाशवायुप्रभवः श्रोत्रग्राह्यः स्थूलशब्दः । यदुक्तं तत्र 'स्थूलं शब्द इति

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

प्रोक्तं सूक्ष्मं चिन्तामयं भवेत् । चिन्तया रहितं यत्तु तत्परं परिकीर्तितम् ।' इति ॥ २२ ॥

तत्र शुद्धाध्वनः भुवनाद्याधारत्वं दर्शयितुमाह--

उत्तीर्णमायाम्बुधयो भग्नकर्ममहार्गलाः ।
अप्राप्तशिवधामानस्त्रिधा विज्ञानकेवलाः ॥२३॥

त्रिविधा हि पश्वात्मानः तत्र मलकर्ममायायुक्ताः सकलाः प्रलयाद्युपसंहृतकलादयो मलकर्मयुक्ताः प्रलयाकलाः । विज्ञानादिभ्यः कर्मणोऽपि क्षयात् मलमात्रयुक्ताः विज्ञानकलाः । ते पुनः मलपरिपाकतारतम्यात् शिवप्रसादेन भग्नकर्ममलाख्यमहारोधाः किंचिदवशेषिताधिकारमलत्वात् असंप्राप्तशिवसाम्याः त्रिविधैव विज्ञानकेवलिनो भवन्ति ॥

के ते भेदा इत्याह--

विद्याविद्याधिपतयः पशुपूर्वाः सदाशिवाः ।
तत्र विद्याभुजः पूर्वे मन्त्रा विद्याश्च नामतः ॥

तत्र प्रथमे विद्यातत्त्वनिवासिन इत्याह तत्र **विद्याभुज** इति ॥ २४ ॥

विद्येश्वरानियोज्यास्ते संख्यया सप्तकोटयः ।
तेषां पुराणि विद्यायां वामादीनि यथोत्तरम् ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

विद्येश्वरनियोज्यत्वं चैषां अनुग्रहकरणत्वात् विद्येश्वराणां च पञ्चविधकृत्याधिकारित्वात् ॥ २५ ॥

स्फीतानि नव जातानि तनुभोगेन्द्रियादिभिः ।

एतानि भुवनानि उत्तरोत्तरं विशिष्टभोगादिमन्तीत्यर्थः ।

अथैतेभ्यो विशिष्टा विद्येशा इत्याह--

मध्याः प्रशान्तकलुषा विद्येशाश्शिवतेजसः ॥
अधिकारमलोपेनास्तत्वमैशं समाश्रिताः ।
शिवार्ककरसंपर्कविकासात्मीयशक्तयः ॥

प्रशान्तमलत्वं अधिकारमलयोगित्वं शिवानुगृहीतत्वं च मन्त्राणामपि समानमेव । शिवतेजसः पञ्चविधकृत्यकारिणः । यदुक्तं श्रीमद्रौरवे । सृष्टिसंरक्षणादानभावानुग्रहकारिणः इति ॥ २६ ॥ २७ ॥

अष्टावनन्तपूर्वास्ते यथापूर्वं गुणाधिकाः ।
तथा पुराणि तत्रैषामनन्तः परमेश्वरः ॥ २८ ॥

अष्टावनन्तपूर्वा इति अनन्तसूक्ष्मशिवोत्तम एकनेत्र एकरुद्र त्रिमूर्ति श्रीकण्ठ शिखण्डिसंज्ञाः ॥

तत्र ईश्वरतत्वे तेषामष्टौ भुवनानि प्राग्वदेव । अत एषां अनन्त एव परमेश्वरः ॥ २८ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तत्राणवः पुरेष्वासन्नाप्यन्ये तद्विभूतयः ।
परे सदाशिवसमाः पतिकृत्याधिकारिणः ॥

तत्तद्भुवनेश्वराराधनादिना दीक्षया वा तेषु भुवनेषु योजिता आत्मानश्च विद्यन्ते अयं च न्यायो विद्याभुवनेषु सदाशिवादिभुवनेषु च विज्ञेयः । यदुक्तं सूक्ष्मस्वायंभुवे । यो यत्राभिलषेद्भोगान्स तत्रैव नियोजितः । सिद्धिभाङ्मन्त्रसामर्थ्यादिति । अथ पशुसदाशिवानाह--**परे सदाशिवसमा** इति ॥ २९ ॥

मूर्धानमध्वनः प्राप्ताः प्रसन्ने परमेश्वरे ।

सदाशिवश्चात्र अधिकारावस्थशिव एव । तस्य च अधिकारादयोवस्था औपचारिका इत्युक्तम् । अधिकारी स भोगी च लयी स्यादुपचारतः । इति । संस्कार्यसदाशिवादीनां तु भेदो वास्तव एव ।

एते च सदाशिवतत्वस्थ सदाशिवभुवनवासिन इत्याह--

तत्वमेषाममूताङ्गपुरभोगादिशोभितम् ॥ ३० ॥
सदाशिवमधिष्ठातृनाम्ना तेऽपि सदाशिवाः ।

अत एवैषां देहादयोवास्तवा एव । अधिष्ठातुः तस्य शिवस्य न पारमार्थिका इत्युक्तम् । श्रीमत्पौष्करे । 'साधकस्य तु लक्ष्यार्थं तस्य रूपमिदं स्मृतम्' इति ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

उक्तार्थमुपसंहरति--

अष्टादशभिरध्वायं भुवनैः सह भोक्तृभिः ॥
त्रिभिश्च तत्त्वैरुद्दिष्टो विशुद्धशिवकर्तृकः ।

एष च अध्वा कार्यत्वात् शिवकर्तृक इत्यर्थः । अत्र च निवृत्त्यादिभुवनानां शक्तिशिवतत्त्वयोश्च सदाशिवतत्त्व एवान्तर्भावो विज्ञेयः ॥

कार्यत्वादेव अस्य शुद्धाध्वनः केनापि नित्येन कारणेन भवितव्यं तच्च बिन्द्वाख्यमित्याह--

सदाशिवादितत्त्वौघो नित्योपादानकारणः । ॥
विकारित्वाद्यथा कुम्भस्तथाचैषततस्तथा ।

एषोऽपि सदाशिवादिरध्वा विकारी ततो नित्योपादानकारण इति ॥

ननु घटोपादानकारणस्य मृत्पिण्डस्य अनित्यत्वात् अनेनापि शुद्धाध्वोपादानेन अनित्येन भवितव्यमिति धर्मिस्वरूपविपरीतसाधकत्वाद्विरुद्धोऽयं विकारित्वादिति हेतुः अत आह--

पार्थिवोऽपि भवेत्कुम्भो मायोपादानकारणः ॥

साक्षान्मृदुपादानत्वेऽपि घटस्य परम्परया मायैवोपादानकारणमिति ॥ ३३ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

कुत इत्यत्राह—

विनाशोत्पत्तिमत्त्वाभ्यां परिणामितया तथा ।

अयमभिप्रायः। उत्पत्तिविनाशधर्मिणां हि वस्तूनां घटकपालाद्यवान्तरपरिणामत्वेनावान्तरकार्यकरणभावे सत्यपि पृथिव्यादितत्त्वानां परंपरयोपादानं मायाख्यं नित्यं परमकारणमभ्युपगन्तव्यम्। अन्यथाऽनवस्थाप्रसङ्गात्। उक्तं च श्रीमत्स्वायंभुवे 'मायातत्त्वं जगद्बीजमविनाश्यव्ययात्मकम्'। इति ॥

एतदेव प्रपञ्चेन साधयति—

यद्यदुत्पद्यते वस्तु तन्मायेयं यथा कला ॥ ३४ ॥
उत्पत्तिनाशौ मायेयधर्मावाह महेश्वरः ।

आप्तवाक्येनापि एतत्सिद्धमिति भावः।

इदानीं सत्कार्यवाददृष्ट्या कलाद्यवस्थाभेदेन उत्पत्तिविनाशव्यपदेशं भजन्ती मायैव कलादिकार्यद्वारेण परिणमत इति दर्शयितुं परिणामशब्दार्थमाह—

परिणामो हि वस्तूनां पूर्वावस्थापरिच्युतेः ॥
अवस्थान्तरसंप्राप्तिः क्षीरस्य दधिभाववत् ।
दध्नश्च तक्रवत्तत्र तक्रावस्था निरूप्यते ॥ ३६ ॥

दृष्टान्तस्वरूपनिरूपणायाह—तत्रेति।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सा हि—

न दध्नो नापि दुग्धस्य पूर्वावस्थे हि ते मते ।

दध्यवस्थायां क्षीरावस्थायां वा तक्रावस्था नास्तीत्यर्थः । तथा हि क्षीरमेव दध्यादिरूपेण परिणमते क्षीरं नष्टं दध्युत्पन्नमित्यादिव्यपदेशश्च दृश्यते ।

एतदेवाह—

सदवस्थं हि वस्त्वेकं पूर्वं क्षीरं ततो दधि ॥

असतः उत्पत्त्यसंभवात् सदेव दधि क्षीरादभिव्यज्यते सदेव तक्रं दध्नोऽभिव्यज्यत इति भावः । अयं च सत्कार्यवादः अस्माभिर्मृगेन्द्रवृत्तिदीपिकायां विस्तरेण दर्शितः ॥ ३७ ॥

यथा चैषां दधिनवनीताद्यवस्थापरिणामभेदेन विचित्रार्थक्रियाणां कार्याणां क्षीरमेव उपादानं एवं तत्वभुवनादिभेदेन विचित्रपरिणामवतां विचित्रार्थक्रियाणां च कलादिकार्याणां साक्षात्परम्परया च मायैव परमकारणमित्याह—

पश्चात्तक्रं तथा माया विचित्रपरिणामतः ।
तत्वतात्विकभावानामुपादानमनश्वरम् ।

यद्येवं क्षीरवत् सर्वात्मना परिणामात् अनित्यत्वं मायायाः तन्न सर्वथा दृष्टान्तासंभवात् परिणामित्वमात्र एव अस्य

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

दृष्टान्तत्वं । ततश्च घृतकीटन्यायेन एकदेशेनैव मायापरिणमत इत्यदोषः ॥ २ ॥

इत्थं घटस्यापि परम्परया नित्योपादानत्वं प्रसाध्य उपसंहरति ।

ततो निदर्शनं साधुप्रसिद्धोक्तविशेषणम् ।

प्रकर्षेण सिद्धमुक्तं नित्योपादानत्वरूपं विशेषणं यस्य तत्तथाविधमिति ।

पारिशेषिकानुमानेनापि विन्दुसिद्धिमाह—

न माया नेश्वरो नाणुर्न शक्तिश्शुद्धवर्त्मनः ॥
उपादानमतो बिन्दुः परिशेषेण लभ्यते ।

तत्र मायाया अनुपादानत्वं साधयति—

तथा हि माया या तेषां क्षोभिताऽनन्ततेजसा ॥
कलादिक्षितिपर्यन्तं तत्वजातमसूत सा ।

तेषां मध्यात् या माया सा हि अचेतनत्वात् अनन्तसामर्थ्यक्षोभितैव स्वकार्यमुत्पादयति । यदुक्तं श्रीमत्किरणे । 'शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः ।' इति ।

तत्रैव हेतूनाह—

अविशुद्धजडत्वेन मायामार्गतया तथा ॥ ४१ ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

दुःखानुषङ्गान्मायेयकार्मणवमलान्वयैः ।
सकलाणूपभोग्यत्वात्परिणामोदयैरपि ॥ ४२ ॥

यतः अस्या अशुद्धाध्वनोऽशुद्धत्वे सति जडत्वं यतश्च मायामार्गत्वं मोहहेतुत्वं यस्माच्च दुःखानुषङ्गः यतश्च मायेयैः अनात्मनि आत्माभिमानादिभिः मलैः कार्मेण सुखदुःखमोहहेतुना विपर्ययासक्त्यादिभावप्रत्ययात्मना मलेनाणवेन चाणोः अनाद्यावारकेण पशुत्वाख्येन संबन्धः । बन्धत्रययोगिनामेव देहेन्द्रियादिजनकत्वात् । अत एव यतश्च सकलाणूपभोग्यत्वं भुवनादिद्वारेण यस्माच्च विचित्रकर्मफलभोगसाधनत्वेन विचित्राः अनेकविधाः परिणामोदयाः परिणामवृद्धयः तस्मादनन्तेन क्षोभिता माया तादृशं कार्यं जनयति । शुद्धस्य शिवस्य अशुद्धविषये कर्तृत्वायोगात् । यद्येवं शिवस्यासर्वकर्तृत्वप्रसङ्गः । तन्न; साक्षात्कर्तृत्वं अत्र निषिद्धम् न तु प्रयोजककर्तृत्वं । अनन्तादेरपि तदधिष्ठानं विना कर्तृत्वासंभवात् ॥ ४२ ॥

एतदेव प्रपञ्चयति—

माया जडान्तरव्याप्ता परिणामवती च यत् ।
निष्पादने कलादीनां शरीरादिसमान्वितम् ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

पुरुषं गमयेदेव पराधीनमसंशयम् ।
सुवर्णमिव कर्मारं मकुटोत्पादकर्मणि ॥ ४४ ॥

ययेवं शिवस्यापि शुद्धविषये कर्तृत्वात् शरीरेन्द्रिययोगादिप्रसङ्गः । तन्न; तस्य नित्यनिर्मलनिरतिशयसर्वार्थज्ञानक्रियायुक्तत्वात् । अशरीरस्यापि आत्मनः स्वदेहस्पन्दादौ कर्तृत्वदर्शनाच्च । अनन्तस्य तु अधिकारमलयोगाच्छरीराद्यपेक्षेत्यविरोधः ॥ ४३ ॥ ४४ ॥

अतश्च—

सैषा विकल्पविज्ञानगोचरैव सती च यत् ।
क्षोभ्यतेऽनन्तनाथेन कुम्भकारेण मृद्यथा ॥

सविकल्पज्ञानविषय एव शरीरिणां कर्तृत्वं दृष्टमिति भावः ॥ ४५ ॥

किमत इत्यत आह—

सविकल्पकविज्ञानं चितेश्शब्दानुवेधतः ।

सविकल्पकविज्ञानमयं घट इति परामर्शरूपात् शब्दोल्लेखादेव आत्मनः दृश्यते ।

किञ्चात इत्यत आह—

स तु शब्दश्चतुर्धा वाग्वैखर्यादिविभेदतः ॥४६॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

जायते बिंदुसंक्षोभादनंतस्यार्थदर्शने ।

अनन्तस्य सविकल्पकज्ञाने तदर्थं अवश्यं शब्दोऽपेक्षितः*। तदानीं च अशुद्धाध्वनोऽनुत्पत्तेः स्थूलाकाशाभिव्यङ्ग्यत्वं न शब्दस्योपपद्यत इति शिवक्षुभितबिन्दुजन्य एव शब्दोऽभ्युपगन्तव्यः । तस्य च वैखर्याद्याश्चतस्रो वृत्तीर्वक्ष्यति । तत्र शब्दोपादानत्वेनापि बिन्दुसिद्धिः ।

किञ्च ।

विद्याशरीरो भगवाननन्तः क्षोभको मतः ॥
मायायास्माच्च विद्धि बैन्दवं तत्त्वमुच्यते ।

अनन्तस्य बैन्दवशरीरयोगश्च श्रूयते तदुपादानतया बिंदुः सिध्यतीति भावः ।

अत्र उपसंहार --

अतो न मायोपादानं तथैवायं महेश्वरः ॥४८॥

बिन्दुरेवात्र शुद्धाध्वनि उपादानमित्यर्थः । किमनेन अप्रसिद्धेन बिंदुरूपेण कल्पितेन । ईश्वरः आत्मा तच्छक्तिर्वा शुद्धाध्वनि उपादानमस्तु । अत आह तथैवायमिति ॥ ४८ ॥

---

*क्ष्य इति पाठभेदः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

चेतनत्वादवृत्तित्वात्परिणामात्ततस्तथा ।
आत्मा शक्तिश्च विज्ञेयौ विस्तरोऽत्रैव वक्ष्यते ॥

मृदादीनां हि उपादानानां अचेतनत्वं दृष्टम् । चेतनाश्च शिवात्मशक्तय: । तत: ते नोपादानं भवितुमर्हन्ति । किञ्च उपादानं हि परिणामेन वा कार्यमुत्पादयति यथा क्षीरस्य दधिभाव: । वृत्तिरूपेण वा यथा पटस्य गृहादिभाव: । शिवादीनामेषां तु वृत्तिपरिणामौ न संभवत: अविकारित्वात् विकारित्वे जडत्वानित्यत्वादिदोषप्रसङ्गात् अस्य प्रपञ्चोऽत्रैव भविष्यति । प्रोक्तश्चास्माभिस्तत्वप्रकाशवृत्तौ ॥ ४९ ॥

अन्यथा बिन्दुसिद्धिमाह—

इतोऽपि लक्ष्यते बिन्दुरणुवैषम्यदर्शनात् ।

कुत इत्यत्राह । **अणुवैषम्यदर्शना**दिति । अणूनां आत्मनां ज्ञानादिवैषम्यदर्शनात् ।

वैषम्यमेवाह—

दृश्यन्ते पुद्गला: केचिदल्पज्ञानाक्रियान्विता: ॥
तेभ्योधिका: परेन्ये तु सर्वज्ञा बलशालिन: ।

एतच्च वैचित्र्यं तेषां न स्वत: संभवतीत्याह ।

पुद्गलश्चेतनो नित्यो विकाररहितो मत: ॥ ५८ ॥

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

आत्मनो हि सर्वदा अनन्तघटपटाद्यध्यवसायज्ञानानुसंधातृत्वेन स्वसंवेदनसिद्धत्वात् देहान्तरफलकर्मभोक्तृतया च चेतनत्वं नित्यत्वं च सिद्धमागमेषु श्रूयते इत्यतः **अस्य न विकारः संभवति** ॥ ५२ ॥

अन्यथा हि—

विकारित्वे जडानित्यभावः स्याद्धटकुड्यवत् ।

अयं च न्यायः शक्तेरपि समानः धर्मधर्मिणोरव्यतिरेकादित्याह ।

तथैव च चितिः शक्तिस्तयोरप्यविकारिणोः ॥

इदं च प्रागेव दर्शितं उक्तं च नादकारिकासु 'अविकार्यत्रात्मोक्तस्तच्छक्तिश्चाप्यतो न योग्यौ तौ । बहुधा स्थातुं यद्वा चैतन्यविनाकृतौ विकारित्वात् ।' इति । अत एव तयोरौपाधिकमेव वैचित्र्यमित्याह । **तयोरपीति** ।

बहुधा यदवस्थानं तदुपाधिवशाद्भवेत् ।

ततश्च—

संपृक्ता चिदणोर्येन मायाद्यर्थावलोकने ।
यदुपाधेर्विचित्रा च स बिंदुर्बहुवृत्तिकः ॥ ५३ ॥

अत्र आत्मनां चिच्छक्तिः येन नादात्मना परिणतेन

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अभिधेयबुद्धिबीजेन संपृक्ता मायेयमविकल्पार्थावलोकने प्रवर्तते । यस्य च प्रत्यात्मनियतैः नादाख्यैः विचित्रैः धृत्तिभेदैः उपाहिता विचित्रैव प्रकाशते स बिंदुः । एतच्च विस्तरेणोक्तं तत्रभवता रामकण्ठेन नादकारिकासु; प्रोक्तं च श्रीमत्कालोत्तरे 'नादाख्यं यत्परं बीजं सर्वभूतेष्ववस्थितम् ।' इति ॥ ५३ ॥

ननु कर्मणैव प्रत्यात्मनियतेन आत्मनां भोगवैचित्र्यवत् ज्ञानादिवैचित्र्यमप्यस्तु । अत आह—

न कर्मणाऽणोर्वैचित्र्यमनपेक्षेण जायते ।
वैचित्र्यमपि भोगस्य सापेक्षेणैव तेन यत् ॥५४॥

कर्म हि कलादितत्त्वभुवनादिसापेक्षमेव भोगवैचित्र्यं करोति । अन्यथा पृथिव्यादीनामप्यनुपयोगात् ।

एवं ज्ञानवैचित्र्यमपि नादसहकृतमेव करोति न केवलम् । तदेव सापेक्षत्वं दर्शयति—

कर्मोपभोगं कुरुते वैचित्र्यं चन्दनादयः ।
तदेव यदि तत्कुर्यात्किं तैरिति विलुप्यताम् ॥

कर्म परं फलजननमेव करोति तस्य तु वैचित्र्यं सहकारिवैचित्र्यादेव भवतीति भावः । 'ननु कर्मतश्च शरीराणि विचि-

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

ष्ठानि शरीरिणामिति । श्रीमत्स्वायंभुवश्रुतेः । कर्मैव साधनवैचित्र्यमपि करोति । सत्यं साधनवैचित्र्यद्वारेणैव कर्म फलवैचित्र्यं करोति न केवलमित्यविरोधः ॥ ५५ ॥

एतदेव द्रढयति ।

प्रवृत्तिः सर्वभूतानां त्यागोपादानकारणम् ।

अपेक्ष्यवस्तुसद्भावे हि हेयानां त्यागार्थं उपादेयानां चोपादानार्थं भूतानां प्रवृत्तिः संभवति नान्यथा ।

प्रकारान्तरेण बिन्दुसिद्धिमाह—

किंचातिशायिकं प्राहुस्तमस्वरमनश्वरम् ॥५६॥
शिवानामसमैश्वर्यभाजां भोगाधिकारयोः ।
ज्योतिर्गणानामाकाशमिव भूतादिकारणम् ॥

यथा हि पञ्चभूतादिभूतमाकाशमवकाशदायित्वेन स्थूलशब्दाभिव्यञ्जकत्वेन च सूर्यादीनां ज्योतिषां भोगाधिकारयोः कारणमेवं शुद्धाध्ववासिनां शिवानां सर्वज्ञत्वसर्वकर्तृत्वात्मकशिवत्वयोगिनां विद्येश्वरादीनां अवकाशदानेन शब्दोत्पादनेन च भोगाधिकारयोः कारणं बिन्दुः सिद्धः तं चानश्वरत्वेनापराकाशं अतिशायिकं परमव्योमाख्यं आगमज्ञाः प्राहुः । अपरस्य तत्र प्रगमासंभवात् ॥ ५७ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अधुना प्रागुक्तं बिन्दोः सविकल्पकज्ञानोपयोगित्वं उपसंहरति—

बिन्दुरेव विकल्पाख्यां सविकल्पकबुद्धिषु ।
स्ववृत्तिभेदसंभेदैरुल्लिखन्लभते चितिम् ॥५८॥

बिन्दुरेव शब्दोपादानत्वात्सूक्ष्मादिवैखर्यन्तशब्दात्मकस्त्ववृत्तिभेदसंबन्धात् 'घटोयं लोहितः, परिवर्तुल' इत्यादिपरामर्शविकल्पोल्लेखनेन सविकल्पज्ञानेषु आत्मनः चितिं सविकल्पकानुभवं उत्पादयति । शब्दानुवेधेन हि जात्यादिविशेषणविशिष्टं सविकल्पकज्ञानमुत्पद्यते । यदाहुः । 'अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम् । बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् । ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया । बुद्ध्याऽवसीयते सापि प्रत्यक्षत्वेन संमता । इति ॥ ५८ ॥

न चायं भावनासंज्ञः संस्कारोऽध्यक्षभावतः ।
संस्काराःस्मृतिलिङ्गा हि नास्मत्प्रत्यक्षगोचराः ॥

नायं सविकल्पानुभवः पूर्वानुभूतवासनात्मकः संस्कारो मन्तव्यः तस्य अनुमेयत्वात् । अस्य च प्रत्यक्षानुभवरूपत्वात् । स्मृत्यन्यथानुपपत्त्या हि संस्कारः कल्प्यते । ननु अध्यवसायस्य बुद्धिकार्यत्वाद्बुद्धिपरिणामभेद एव सविकल्पानुभवः ॥ ५९ ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अत आह—

न बुद्धेः परिणामो वा मायोर्ध्वमपि संभवात् ।

बुद्धेरध्यवसायहेतुत्वेऽपि बिन्दुकार्यशब्दसहकारादेव सविकल्पकज्ञानं जन्यत इत्युक्तम् । अत एव शुद्धाध्वनो बुध्यभावेऽपि वाक्छक्तिद्वारेण विद्येश्वरादीनां सविकल्पानुभवः सिद्धः ।

ततश्च ।

तथा विद्येश्वरोऽनन्तो मायामाक्रम्य तेजसा ॥

ततः सृष्टिं प्रकुरुते सविकल्पकबोधवान् ।
अणुत्वे सति कर्तृत्वादस्मत्प्रेष्यो यथा जनः ॥

अनन्तस्य अणुपक्षतया अधिकारमलशेषेण प्रेर्यत्वात् सविकल्पकज्ञानयोगादेव मायाक्षोभकत्वम् । न तु शिवस्य बिन्दुक्षोभवन्निर्विकल्पकमात्रेणेति भावः ॥ ६१ ॥

इत्थं अनन्तस्य सविकल्पकज्ञानयोगेन कर्तृत्वाच्छब्दद्वारेण विद्येश्वरादीनां तद्धेतुत्वेन बिन्दुसिद्धिरित्युक्त्वा अधुना अस्मिन्नेवार्थे अन्येषां मतमाह—

अन्ये वृत्तिपरीणामभेदवादाविशारदाः ।
गुरवः कथयन्त्येनमन्यथोक्तविशेषणम् ॥ ६२ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

उक्तविशेषणं एव अर्थं अनन्तस्य सविकल्पकज्ञानयोगेन कर्तृभावं अन्ये गुरव अन्यथा साधयन्ति ॥ ६२ ॥

परिणामस्य कर्ता यन्न तु वृत्तेस्ततस्तथा ।

यतोऽयमनन्तः परिणामस्य कर्ता ततस्तथाविधसविकल्पकज्ञानवानित्यर्थः

एतदेव साधयति—

इदमेवं मया क्षुब्धमिष्टं संपादयेद्ध्रुवम् । ६३ ॥
इति जानाति यः शक्तः स कर्ता परिणामिनाम् ।

वृत्तिकर्तुस्तु न तदपेक्षेत्याह—

परिणामिष्वयं धर्मो वृत्तिमत्स्वन्यथा भवेत् ॥

एतदेव प्रपञ्चयितुं सविकल्पकज्ञानस्य निर्विकल्पकज्ञानपूर्वकत्वमाह—

तथा हि सर्वो निर्धूतविकल्पमवलोकयन्
वस्तु लोको विजानाति सविकल्पकमन्यथा ॥

निर्विकल्पकज्ञानानन्तरं सविकल्पकज्ञानं भवतीत्युक्तं प्रागेव । अन्यथा ज्ञानानवस्था सविकल्पज्ञानानभ्युपगमे निर्विकल्पकस्य वस्तुमात्रावभासकत्वेन सर्ववस्तुसाधारणत्वात् ज्ञानानवस्था स्यात् । घटज्ञानमित्यादिनियमोऽनुपपन्न इत्यर्थः ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

ततश्च ।

अनन्तेनापि शब्दानुविद्धविज्ञानपूर्वकम् ।
सर्वं चेदिह विज्ञातमिष्यते तेष करोति च ॥

सविकल्पं विजानामीत्यवबोधाभिमानतः ।

यस्मात्सविकल्पकं ज्ञानं जानामीत्यवबोधरूपत्वात्परामर्शरूपेणांतःसंजल्पात्मकेन शब्देनानुविद्धं जायते तस्माच्छब्दानुविद्धसविकल्पकज्ञानपूर्वं मायादि वस्तु ज्ञात्वा अनन्तः क्षोभादिकं करोति । अज्ञातस्य करणादर्शनात् ॥ ॥

शिवस्य तु वृत्तिकर्तुः बिन्दुक्षोभेन तदपेक्षेत्याह--

वृत्तिरेव मता बिन्दोः पटस्येव कुटी ततः ॥
निर्विकल्पकबोधेऽपि बिन्दुर्माशोऽधितिष्ठति ।

अनन्तस्य च परिणामकर्तुः अस्त्येव सविकल्पकज्ञानापेक्षेयुपसंहरति ।

नैवं विश्वेश्वरो मायामेषा हि परिणामिनी ॥

इत्थं परमतमुपन्यस्य दूषयति ।

न वृत्तिपरिणामाभ्यां कर्तृभेदोऽवधार्यते ।
कुर्वतोऽपि कुटीं बुद्धिः सविकल्पा हि दृश्यते ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

हीति यस्मादर्थे एतच्च परमताभ्युपगमेन दूषणमुक्तं न तु सिद्धान्ततया बिंदोरपि तत्त्वभुवनादिरूपेण परिणामश्रुतेर्वृत्तिपरिणामयोरत्यन्तभेदाभावाच्च ॥ ५९ ॥

इदानीं बिंदोः पर्यायनामान्याह——

शब्दतत्त्वमघोषा वाग्ब्रह्म कुण्डलिनी ध्रुवम् ।
विद्या शक्तिः परा नादो महामायेति देशिकैः ॥
बिन्दुरेवं समाख्यातो व्योमानाहतमित्यपि ।

इदानीं बिन्दोः सूक्ष्मादिशब्दवृत्तीः संहारक्रमेण दर्शयति ।

चतस्रो वृत्तयस्तस्य याभिर्व्याप्तास्त्रिधाणवः ॥

याभिर्व्याप्ताणवः प्रोक्तवत् उत्तममध्यमापकृष्टज्ञानादिमन्तो भवन्ति ॥ ७१ ॥

कास्ता इत्यत्राह——

वैखरी मध्यमाभिख्या पश्यन्ती सूक्ष्मसंज्ञिता ।

अत आसां कारणत्वेन बिन्दुः सिद्ध इत्यर्थः ।

वैखरीस्वरूपमाह——

तत्र सा वैखरी श्रोत्रग्राह्या याऽर्थस्य वाचिका ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सा च ।

स्थानेषु विधृते वायौ कृतवर्णपरिग्रहा ।
प्रयोक्तॄणामियं प्रायः प्राणवृत्तिनिबन्धना ॥

तदाहुः ।

आकाशवायुप्रभवश्शरीरा-
समुच्चरन्वक्त्रमुपैति नादः ।
स्थानान्तरेषु प्रविभज्यमानो
वर्णत्वमागच्छति यस्स शब्दः इति ॥

मध्यमामाह--

केवलं बुद्ध्युपादानाक्रमाद्वर्णानुपातिनी ।
अन्तःसंजल्परूपा तु न श्रोत्रमुपसर्पति ॥
प्राणवृत्तिमतिक्रम्य वर्तते मध्यमाह्वया ।

एषा च परामर्शज्ञानस्वरूपा स्थूलशब्दस्यापि कारण-मित्युक्तम् ।

अविभागेन वर्णानां सर्वतः संहृतिक्रमात् ॥
स्वयंप्रकाशा पश्यन्ती मायूराण्डरसोपमा ।

इयं च अक्षरबिन्दुरूपेत्युक्तम् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

इदानीं अभिधेयबुद्धिबीजत्वेन प्रागुक्तां नादापरपर्यायां सूक्ष्मावस्थामाह--

स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥

अनपायिनीत्वं च अस्याः सुषुप्त्याद्यवस्थास्वपि संभवात् न तु नित्यत्वेन । अस्या अपि प्रतिपुरुषं भेदेन अनेकत्वात् अचेतनत्वाच्च कार्यत्वात् तस्याश्च कारणं परबिन्दुरेवेत्युक्तम् ॥

तामेव विशेषयति--

यस्यां दृष्टस्वरूपायामधिकारो निवर्तते ।

यस्यां पुरुषस्वरूपाद्विवेकेन दृष्टस्वरूपायां पुरुषस्य भोगाधिकारो निवर्तते । यद्येवं विवेकज्ञानादेव मोक्षसिद्धेर्दीक्षानर्थक्यप्रसङ्गः तन्न । मलस्य द्रव्यत्वाच्चक्षुः पटलस्य चक्षुर्वैद्यव्यापारेणेव ईश्वरव्यापारेण दीक्षाख्येनैव निवृत्तिसिद्धेः ।

ततश्च । तद्विषयविवेकविज्ञानाभावादेव शब्दब्रह्मवादिनः पुरुषसमवायिनीं तां मन्यन्त इत्याह--

पुरुषे षोडशकले तामाहुरमृताह्वयाम् ॥ ७६ ॥

एवं हि तेषां भ्रम इत्याह--

केवलः परमानन्दो धीरो नित्योदितः प्रभुः ।
नास्तमेति न चोदेति न भ्रान्तो न विकारवान् ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सर्वभूतान्तरचरः शब्दब्रह्मात्मको रविः ।
भित्त्वाऽयं बोधखड्गेन निर्गच्छन्त्यविशंकिताः ॥

यमेनं सम्यग्ज्ञानाख्येन खड्गेन भित्त्वा विविच्य यथावत् ज्ञात्वा संसारात् निर्गच्छन्ति आत्मानः। सोयं शब्दब्रह्माख्यो रविः अस्माद्रवेः विलक्षण इति तेषां भ्रमः ॥ ७८ ॥ ७९ ॥

अत्र सिद्धान्तमाह—

तामेव वाणीं सूक्ष्माख्यामाहुरात्मविदो जनाः ।

एवशब्दो भिन्नक्रमः। आत्मस्वरूपविदस्तु शैवाः तां सूक्ष्माख्यां बिन्दुकार्यभूतां शब्दवृत्तिमेव मन्यन्ते न तु पुरुषसमवायिनीं तस्याविकारित्वेन जडत्वात्तत्समवाये पुरुषस्यापि विकारित्वाऽचेतनत्वादिदोषप्रसङ्गात् ।

इत्थं बिन्दुकार्यरूपाश्शब्दवृत्तीः प्रदर्श्य उपसंहरति।

प्रत्यात्मनियता एता वृत्तयो बन्धनात्मिकाः ॥

आसां च कार्यत्वेन जडत्वान्न चित्समवायो युज्यते। अपि तु बन्धनत्वमेवेत्यर्थः ॥ ८० ॥

तथापि ।

आभ्यो विविक्तमात्मानं न हि पश्यन्ति पुद्गलाः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

पुद्गला मलयुक्तात्मान इत्यर्थः मलावृतत्वादात्मनां तद्विवेकज्ञानाभावेन तास्वेव आत्मभ्रान्तिरिति भावः ।

कुत एव एषामयं भ्रमः इत्यत्राह—

[1]परमात्मैव वागात्मा वागेवात्मेति च श्रुतेः ॥

आत्मनो वाक्छक्त्यादिसंबन्धस्य अर्थवादभूतानां आसां श्रुतीनां अर्थापरिज्ञानात् एवं ते मन्यन्ते पुद्गलाः मलयुक्तात्मान इत्यर्थः ॥ ८१ ॥

वैखरी श्रोत्रजे बोधे मध्यमा सविकल्पके ।
पश्यन्ती मध्यमोत्पादसमुद्योगेषु लक्ष्यते ॥

वैखरी श्रोत्रग्राह्यैव मध्यमा परामर्शज्ञानरूपत्वात् सविकल्पके लक्ष्यते । तस्या अपि समुत्पादनहेतुः पश्यन्ती ।

अन्या तु ।

यदावृत्तिरशेषेण विलीना चित्तसंश्रया ।
तदा सूक्ष्मा विशुद्धेव चिदाभात्याविवेकतः ॥

सूक्ष्मा तु अभिधेयबीजत्वेन सर्वभूतेष्ववस्थिता पश्यन्त्या अपि कारणभूता चिदा अत्यन्तसंश्लेषात् तद्रूपेव भातीत्युक्तम् ।

---

[1] पुमानेव हि वागुक्तो वाक्पूरुष इतीरणात् इति पाठभेदः ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

उक्तन्यायेन च ।

न सोऽस्ति प्रत्ययोऽणूनां यश्शब्दानुगमादृते ।
अनुविद्धमिह ज्ञानं सर्वं शब्देन जायते ॥ ८४ ॥

किञ्च ।

सैषा चतुर्विधा वृत्तिर्निवृत्त्यादिकलाश्रयात् ।
पञ्चधा भिद्यते भूयः कलास्ता बिन्दुवृत्तयः ॥

सैषा शब्दात्मिका बिन्दुवृत्तिर्निवृत्त्यादिकलाश्रयाणां आत्मनां तारतम्येन पञ्चधा ज्ञानाद्युपकारिकेत्यर्थः । निवृत्त्यादयः पुनः कुत उत्पन्ना इत्यत्राह । **कलास्ता** इति । बिन्दोरेव अवस्थाभूताः कलाकारवृत्तयः । ततः कलोपादानत्वेनापि बिन्दुसिद्धिरिति भावः ॥ ८५ ॥

ता एव नामतो दर्शयति—

निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिश्च पञ्चमी ।
शान्त्यतीताः कला एता याभिर्व्याप्तोऽध्वपञ्चकम् ॥

एताश्च सदाशिवभुवनोर्ध्वं भुवनत्वेन स्थिता अपि शक्तिरूपेण समस्ताध्वव्यापिकाः स्थिता इत्याह—**याभिर्व्याप्तोऽध्वपञ्चकम्** इति ॥ ८६ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तत्त्वाध्वा भुवनाध्वा च वर्णाध्वा च पदात्मकः ।
मन्त्राध्वा व्यापकस्तेषां कलाध्वा बिन्दुमाश्रितः ॥

तत्त्वादिपञ्चाध्वव्यापकः प्रोक्तरूपकलाध्वा बिन्दुमुपादानत्वेनाश्रित इत्यर्थः । तत्र तत्त्वाध्वा शिवादिपृथिव्यन्तशुद्धाशुद्धतत्त्वरूपः । भुवनाध्वा तु अनाश्रितादिकालान्तभुवनात्मकः । वर्णाध्वा च मातृकैव । पदाध्वा व्योमव्यापिसंज्ञः । मन्त्राध्वा पुनः संहितामन्त्रा एव ॥ ८७ ॥

कथंपुनरेषां अध्वसंज्ञा अत आह—

त्यक्त्वैकमेकं संप्राप्य कलादिष्वजरामरम् ।
पदमासाद्यते पुम्भिरतोऽध्वानःकलादयः ॥ ८८ ॥

यथा हि लोके अध्वसु क्रमादेकपदावष्टब्धं भूप्रदेशं मुक्त्वा अन्यपदावष्टब्धं भूप्रदेशमासाद्य ग्रामादि प्राप्यते । तथा कलासु तत्वेषु भुवनेषु वर्णेषु पदेषु मन्त्रेषु वा अशुद्धविषयेषु कर्मभोगार्थं शुद्धविषयेषु सर्वज्ञत्वादिप्राप्त्यर्थं दीक्षायां विशिष्टसंबन्धात्मकं योजनं क्रियते । ततः कलादिवस्तुपद्धतयः अध्वान इत्युच्यन्ते ॥ ८८ ॥

तेषु च ।

कलाध्वा वर्णितः पूर्वं निवृत्त्यादिविभेदतः ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

व्याप्तिं तस्याभिधास्यामि साधाराङ्काधिदेवताम्
साकारकारणामात्मबिन्दुशक्तिशिवाश्रयाम् ।

आधारा हृदयादयः । अङ्कानि चिह्नानि वज्रादीनि । अधिदेवता अधिष्ठातृदेवताः सद्योजातादयः । आकारश्चतुरश्रादिः । कारणान्यधिपतयः ब्रह्मादयः । आत्मबिन्दुशक्तिशिवाश्रयामित्यत्र आत्मनां भोगादिकरणत्वेन आश्रयभूतानां किं च बिन्दुरुपादानतया शक्तिः कारणतया आधारकत्वेन च शिवः कर्तृतया आश्रयः यस्याः कलाव्याप्तेस्ताम् ।

तत्र तावन्निवृत्तिव्याप्तिं संहारक्रमेणाह—

निवृत्तौ पार्थिवं तत्वं पुराण्यष्टोत्तरं शतम् ॥

तेषु कालानलादीनामनन्ताण्डस्य षड्बहिः ।
प्राच्यादिषु दशस्वासन्नाशास्वेकैकशो दश ॥

रुद्राणां शतसंख्यानां वीरभद्रस्य चोपरि ।
भद्रकाल्याश्च भुवने क्षकारोर्णेषु कीर्तितः ॥

तत्र रुद्रनामान्येव भुवनानामपि नामानि । भुवनादयश्च पद्धत्यामेव अस्माभिर्विविच्य दर्शिताः । ग्रन्थविस्तरभयात्पद्धत्यन्तरेषु बहुशः प्रसिद्धत्वाच्च नात्र लिख्यन्ते ॥ ९२ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

एकाशीतिपदा देवी प्रतिसर्गपदक्रमात् ।
अष्टाविंशतिसंख्यैस्तु पदैरत्र प्रतिष्ठिता ॥९३॥

एकाशीतिपदा देवी व्योमव्यापिलक्षणा शक्तिः सा च प्रतिसर्गपदक्रमात् संहारक्रमेण अन्त्यप्रणवादारभ्य अष्टाविंशतिपदैः अत्र निवृत्तिकलायां व्यवस्थिता ॥ ९३ ॥

किञ्च ।

मन्त्रावजातहृदयौ तत्र सा तु परा कला ।
भुवनादीनभिव्याप्य पञ्चपञ्चसु वर्तते ॥ ९४ ॥

पञ्चाध्वनो व्याप्य तेष्वेव वर्तत इत्यर्थः ॥ ९४ ॥

इत्थं निवृत्तिव्याप्तिमभिधाय एतस्याकारादीनाह—

पीतैषा चतुरश्रा च कठिना वज्रलाञ्छिता ।
ध्यातव्योद्यदनेकार्चिर्मांसला हृदयाम्बुजे ॥

तस्या निवृत्तिसंज्ञाकारणमाह—

तत्प्रलीनाणुसंघस्य संकल्पो विनिवर्तते ।
अनासाद्य फलं तेन निवृत्तिरभिधीयते ॥९६॥

किञ्च ।

ब्रह्माऽत्र कारणं मन्त्रः सद्योजातोऽधिदेवता ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

प्रतिष्ठाया अप्याह—

प्रतिष्ठायां तु चत्वारि कलायामवनीं विना ॥

भूतानि पञ्च तन्मात्राः पञ्च कर्मेन्द्रियाणि च ।
पञ्च बुद्धीन्द्रियाण्यासन्मनोहंकारबुद्धयः ॥९८॥

अव्यक्तमपि वर्णाश्च हादिटान्ता विलोमतः ।
त्रयोविंशतिराम्नातांष्षट्पञ्चाशत्पुराणि च ॥

जलतेजोऽनिलाकाशबुद्ध्यव्यक्तेष्वहङ्कृतौ ।
अष्टावष्टौ पदान्येकविंशतिस्तत्र संख्यया ॥

शिरो वामश्च मन्त्रौ द्वौ विष्णुः कारणमुच्यते ।
सा तु शुक्लार्धचन्द्राभा नीलोत्पलदळाङ्किता ॥

ध्यातव्या गळपद्मान्तर्बहुळालोकशालिनी ।
तत्प्रलीनाणुसंघस्य संकल्पोऽर्थप्रसिद्धये ॥१०२॥

प्रतिष्ठितो यतस्तेन प्रतिष्ठा नाम सा कला ।
वामदेवो ह्यधिष्ठाता वाच्यमन्त्रात्मको मतः ॥

मननं सर्ववेदित्वं त्राणं संसार्यनुग्रहः । मननत्राणधर्मित्वान्मन्त्र इत्यभिधीयते ॥ इति न्यायात् शिवशक्तितदनुगृ-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

हीतेषु मन्त्रशब्दो वर्तते उपचारात्तु वाचकशब्दे प्रसिद्धः ततः अत्रापि सद्योजातवामदेवादिशक्तिभेदा एव अधिदेवतात्वेन उच्यन्ते । अत एव तासु निवृत्यादिषु भुवनरूपासु सद्योजातादिविग्रहः शिवः अभिध्येयः तत्पदप्राप्तिकामैरिति गुरवः ॥ १०३ ॥

विद्यायास्तु आह—

विद्यायां सप्त पुरुषो रागो नियतिसंयुतः ।
विद्या कला च कालश्च मायातत्वानि तत्र तु ॥

मायादिभुवनानां च विज्ञेयास्सप्तविंशतिः ।
ज्ञादयोऽत्र घकारान्ता वर्णास्सप्त विलोमतः ॥

पदानि विंशतिर्मन्त्रौ शिखाघोरौ व्यवस्थितौ ।
रुद्रोऽत्र कारणं मन्त्रो बहुरूपोऽधिदेवता ॥

सा तु स्फुरदनेकार्चिस्त्रिकोणा स्वस्तिकाङ्किता ।
ध्यातव्या तालुपद्मान्तर्नीलाञ्जनसमद्युतिः ॥

तत्प्रलीनाणुसंघस्य संकल्पोऽशेषगोचरः ।
सर्वार्थद्योतको येन तेन विद्येति गीयते ॥१०८॥

अशेषगोचरः स्वभुवनाधोवर्तिसमस्ताध्वविषयः । न तु सर्वविषयः । तस्य मलाभाव एव संभवात् ॥ १०८ ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

शान्तौ तु त्रीणि तत्त्वानि दशाष्टौ भुवनानि च।
कथितान्यत्र वर्णास्तु गादिकान्तास्त्रयो मताः ॥

पदान्येकादशालासन्मन्त्रौ वक्त्रतनुच्छदौ ।
भुवनादीन्यभिव्याप्य पञ्चषड्बिन्दुलाञ्छिता ॥

षट्कोणोदितकल्पान्तसहस्रकिरणद्युतिः ।
ध्यातव्या सा परा शक्तिर्भ्रूमध्यकमलोदरे ॥

तत्प्रलीनाणुसंघस्य द्वेषरागाद्यभावतः ।
संकल्पस्य प्रशान्तत्वाच्छान्तिरेषा निगद्यते ॥

ईश्वरः कारणं तत्र मन्त्रस्तत्पुरुषाह्वयः ।
तदाधिष्ठायको ज्ञेयः पुरुषस्त्वाधिदेवता ॥ ११३ ॥

अत्र च त्रीणि तत्वानि पञ्चमी तु परा कला ।
शिवतत्वात्मकं तत्र पुराणि दश पञ्च च ॥

वर्णा विसर्गपूर्वा ये षोडश स्वरसंज्ञिताः ।
ओमित्याद्यं पदं मन्त्राः शिवास्त्रेशानशब्दिताः ॥

शान्त्यतीता च पञ्चाध्वगर्भिणी परमा कला ।
चिन्तनीया महाकाशस्वरूपा मूर्धपङ्कजे ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

ईशानो मन्त्रराडेनामधितिष्ठति कारणम् ।
देवः सदाशिवस्तत्र कलाध्वेति प्रकीर्तितः ॥

व्यापको भुवनादानामभिव्याप्तः स बिंदुना ।
बिन्दुश्शक्त्या शिवेनैषा नान्येन व्याप्यते शिवः॥

त्रीणीति । विद्येश्वरसदाशिवाख्यानीत्यर्थः । अत एव शक्तितत्वस्य शिवतत्वे अन्तर्भावं मन्यमानः शान्त्यतीता व्याप्तिमाह—पञ्चमी त्विति । व्यापक इति । उक्तवदितराध्वनां व्यापकः कलाध्वा बिंदूपादानक इत्युक्तः । कर्तृभूतः शिवः कारणभूतया समवायिन्या शक्त्या बिंदुमधितिष्ठति शिवस्य तु नाधिष्ठातास्तीत्यर्थः ॥ ११८ ॥

एतदेवाह—

स हि देवस्समावृत्य स्वशक्त्याऽनन्यभूतया ।
सर्वमाक्रम्य च तया विजानाति करोति च ॥

अतः शक्तेः सर्वज्ञानक्रियारूपत्वं सिद्धम् ॥ ११९ ॥

इदानीं व्याप्तिस्वरूपं विचारयति—

अन्यस्यान्यत्र सद्भावः सर्वदाऽव्यभिचारिणी ।
व्याप्तिरात्मपदार्थात्मलाभिस्थितिनिबन्धनम् ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अन्यस्य आकाशादेः अन्यत्र कुड्यादावस्तित्वं सर्वकालमव्यभिचारिणी व्याप्तिः सा च आप्तस्य पदार्थस्य आत्मलाभनिबन्धनं उत्पत्तिनिबन्धनं स्थितिनिबन्धनं च भवति ॥

अत एव—

द्विधा सा सन्निधावेका परमात्मविधानतः ।

तदेव दर्शयति—

तत्र सन्निधिमात्रेण विदधात्यखिलं चितिः ॥
यथार्को दिनचेष्टानां सन्निधेरुपकारकः ।

चितिः चैतन्यात्मिका शिवस्य समवायिनी शक्तिः संकल्पमात्रेण सृष्ट्यादिकृत्यं विदधाति सूर्य इव कमलविकासादि तथा ह्यात्मनोऽपि स्वदेहस्पन्दनादौ सङ्कल्पमात्रेण कर्तृत्वं दृष्टम् ।

ततश्च चिदधिष्ठानेनैव जडस्य आत्मनि विधानरूपा व्याप्तिरित्याह—

बिन्दुरात्मनि नादादीनध्वनष्षडपि क्रमात् ।
विचित्रैः परिणामैस्तैर्विदधाति शिवेरितः ।
यथा मृत्कलशादीनि कुलालाधिष्ठिता सती ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अध्वनः षडपीति । कलावर्णपदमन्त्रतत्वभुवनात्मनः सर्वानेव विन्दुरुत्पादयति । तत्वभुवनाध्वानौ शुद्धरूपाविव । अशुद्धयोस्तु तत्वभुवनाध्वनोर्मायोत्पन्नत्वात् ॥ १२४ ॥

किञ्च ।

येन यद्व्याप्यते वस्तु परिणामितया स्वयम् ।
सा तस्य विकृतिः प्रोक्ता हेम्नस्तु मकुटो यथा ॥

एनमेवार्थं साध्यविषये योजयति—

बिंदुना व्याप्यते योऽसौ षड्विधोऽध्वा कलादिकः ।
सा तस्य विकृतिस्तेन व्याप्तत्वान्नादबिंदुवत् ॥

अशुद्धतत्त्वभुवनव्यतिरिक्तः षड्विधोऽध्वा कार्यत्वेन नाद विन्दुवत्स्वकारणं बिंदुं गमयतीति भावः ॥ १२५ ॥

इदानीं बिंदुसमवायवादिनां मतमुपन्यस्यति—

केचिदाचक्षते बिंदुः समवैति शिवे ततः ।
दृक्छक्तिवत्क्रियाशक्तिरियं कुण्डलिनी परा ॥

ज्ञानशक्तिवदन्यापि बिंद्वात्मिका क्रियाशक्तिः शिवे समवैति न तु मायावत्ततो व्यतिरिक्तेति भावः ॥ १२६ ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

एवञ्च ।

द्वे शक्ती समवायिन्यौ शिवे ज्ञानक्रियात्मिके ।

एतदेव प्रपञ्चयति । तत्र ।

आद्या तु संविद्विज्ञानं क्रिया कुण्डलिनी परा ॥

आद्यायाः संविद्विज्ञानमिति च व्यपदेशः । अन्यस्यास्तु क्रियाकुण्डलिनीति च ॥ १२७ ॥

तयोस्तु ।

ज्ञानशक्त्या विजानाति क्रियया कुरुते जगत् ।

शिव इत्यध्याहारः ।

कुत इत्यत्राह—

क्रिया हि फलदा पुंसां न ज्ञानं स्यात्फलप्रदम् ॥

यतः कुलादीनामपि क्रियाशक्तिरेव प्रयत्नात्मिका घटाद्युत्पादनरूपं फलमावहति । ज्ञानशक्तिस्तु तत्तदर्थविषयीकरण एव चरितार्था । ततः शिवोऽपि ज्ञानशक्त्या विजानन् क्रियाशक्त्या सर्वं करोतीति ॥

ततश्च ।

ताभ्यां तु विरहस्तस्य ते च न स्तः शिवं विना ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

इत्थं मतान्तरेण बिंदोः शिवसमवायं प्रदर्श्य तन्मतेनैव सदाशिवादितत्वान्यपि दर्शयति—

त्रयोः प्रसारतोः साम्ये तत्वात्मा स्यात्सदाशिवः।
ईशाऽधिकक्रियाशक्त्योर्विद्याज्ञानातिरिक्तयोः

तयोः क्रियाज्ञानयोः साम्येन प्रसरतोः सतोः क्रियाशक्तेरिव सदाशिवतत्वात्मपरिणामो भवति । क्रियाशक्त्याधिक्ये तु ईश्वरतत्वात्मा ज्ञानशक्त्याधिक्येऽपि विद्यातत्वात्मा ।

किञ्च ।

तत्वेषु तेषु विज्ञानकेवलानां महात्मनाम् ॥

भुवनानि विचित्राणि स्वभावललिताः प्रियाः ।
भोगानप्यपरिम्लानान्यङ्गानि करणानि च ।

विदधाति शिवः शक्तेरनन्यायाः क्रियात्मनः ।
नादादीनपि तेनैष कर्ता शुद्धाध्वनो मतः ॥

उक्तार्थमुपसंहरति—

अतो नायं पृथक्छक्तेः शक्तिरेव क्रियात्मिका ।
समवेता शिवे बिन्दुरिति तत्राभिधीयते ॥

अतोयं बिन्दुः शिवसमवायिन्याः ज्ञानशक्तेर्नात्यन्तं पृथग्भू

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तोऽपि तत्समवेता क्रियाशक्तिरेवेति केचिन्मन्यन्ते अथ तन्निरासायाह । तत्रेति । सिद्धान्तोऽभिधीयत इत्यर्थः ॥

तमेवाह—

सोयमात्मनि तत्त्वौघमनेकभुवनावलिम् ।
विदधद्विविधानल्पतनुभोगेन्द्रियादिकम् ॥

बिन्दुराख्यायते युक्त्या परिणामी प्रधानवत् ।

बिन्दोस्तत्त्वभुवनाद्युपादानत्वेन श्रुतेः प्रधानवत् मृदादिवद्वा परिणामित्वमवश्यं अभ्युपेयम् ।

किमत इत्यत्राह—

परिणामि च यद्वस्तु तदवश्यं जडात्मकम् ॥
यथा क्षीरं जडत्वेऽस्य समवायः कथं शिवे ।

परिणामित्वाच्चास्य क्षीरादिवज्जडत्वं सिद्धम् । ततश्च । नास्य चित्समवायो युज्यत इत्याह । जडत्वे इति ।

तत्समवायाभ्युपगमे शिवस्यापि अचेतनत्वं प्रसज्यत इत्याह—

स हि तादात्म्यसंबन्धो जडेन जडिमावहः ।
शिवस्यानुपमाखण्डचिद्घनैकस्वरूपिणः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

नित्यमुक्तत्वादनुपमं सर्वविषयत्वात् अखण्डं चिद्घनं ज्ञानक्रियात्मकं घनं शरीरं एकमेव स्वरूपं यस्य तस्य शिवस्यायमर्थः चेतनात्मिका शक्तिरेव शिवस्य देहः । सा चैकाऽपि ज्ञेयकार्याद्युपाधिभेदादुपचारेण ज्ञानाक्रियाशक्त्यादिव्यपदेशं भजते । पञ्चकृत्योपकारिभिः ईशानाद्यवस्थाभेदैः शरीरकार्यं कुर्वाणोपचारेण शरीरत्वेनापि उपचर्यते इति नास्याचेतनबिन्दुसमवायो युज्यते । तत्समवाये तु अचेतनत्वादिदोषप्रसङ्गात् ॥

अस्तु अचेतनः को दोष इति चेत्—

यस्त्वेनं मन्यते मोहाज्जडधीर्जडमीश्वरम् ॥

न तस्य युक्तिः शास्त्रं वा नात्मा नास्ति च देवता ।

ईश्वरस्याचेतनत्वाभ्युपगमे जगत्कर्तृत्वेन ईश्वरं साधयता अनुमानेन तस्य चेतनत्वादिस्वरूपप्रतिपादकैः आगमैश्च बाधः । किञ्च न्यायस्य समानत्वाच्छिवसमानजातीयात्मानोऽपि अचेतनाः प्रसज्येरन् । तेषाञ्च भोगमोक्षकर्तृतया देवतापि न सिद्ध्यति ।

ततश्च ।

स वर्जनीयो विद्वद्भिः सर्वास्तिकबहिष्कृतः ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

ननु युष्मत्पक्षेऽपि शिवस्य कर्तृत्वेनाभ्युपगमात् क्रियावेशेन परिणामिता प्रसङ्गोऽत आह——

क्रियया हेतुभूतत्वात्क्रियाशक्तिश्चिदेव यत् ।

नात्र क्रियावेशः कर्तृत्वमपि तु क्रियायां शक्तत्वमेव ततश्च अयस्कान्तशक्तेरिवायसि शिवशक्तेः सन्निधिमात्रेण बिन्दावेव क्रियावेशोऽतः क्रियाहेतुभूतत्वात् ज्ञानशक्तिरेव क्रियाशक्तिरुच्यत इत्यविरोधः ॥

अत्र पराशङ्कापूर्वकं जायते ध्यायतः शुद्ध इत्यादि प्रागुक्तमेव समर्थयति ।

बिन्दुरन्यो न मायोर्ध्वमचिदस्तीति चेन्मतम् ॥

जायतेऽध्वा कुतः शुद्धः क्व वा लीयेत केन वा ।
षोढा भवेदयं तत्वभुवनादिविभेदतः ॥१४०॥

विज्ञानकेवलास्त्रेधा कथं कस्माच्च ते पुनः ।
विमुच्येरन्नृते बिन्दोस्तद्वैचित्र्यविधायिनः ॥

ननु चिद्रूपा शिवशक्तिरेव तस्य सर्वस्य हेतुरत आह——

न हि चित्परिणामेन कुरुते तदशेषतः ।
चैतन्यभावादित्यग्रे वक्ष्यते शक्तिनिर्णये ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

एतत्प्रागेव दर्शितं साधितं च अस्माभिस्तत्वप्रकाशवृत्तौ विस्तरेण ॥ १४२ ॥

अत्र पराशङ्का ।

स्यादेष कल्पितानेकभेदः कार्यविशेषतः ।
एक एव शिवो नैकशक्तिमानिति चेन्मतम् ॥

ननु उक्तवच्चेतनस्य शिवस्य तत्वादिरूपेण परिणामो न युज्यते किं त्वेकस्यापि शिवस्यानेकशक्तेः कार्यभेदादौपचारिकः सदाशिवादितत्वभेदः काल्पनिक एव न तु पारमार्थिक एवेति यद्येवं भवतोऽभिमतं । तत्सत्यमेवाधिष्ठातृविषये शिवस्य अधिष्ठातुः अवस्थाभेदस्य [1]अधिष्ठेयभेदकृतत्वेन औपचारिकत्वात् अधिष्ठेयस्य शुद्धाध्वनः तत्वभुवनादिभेदः सत्य एव अन्यथा उपचारस्याप्ययोगात् ॥ १४३ ॥

अथ चिद्वर्ततया सोऽपि असत्य एवेष्यते तदानीम् ।

मायेयोपि तथा तु स्यादध्वा युक्त्यविशेषतः ।

विवर्ताभ्युपगमस्य अशुद्धाध्वनि च संभवात् सोऽपि असत्यतामापाद्येतेत्यर्थः ॥

---

[1]अधिदेवताभेद इति पाठभेदः.

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अस्तु सोऽपि असत्यः को दोष इति चेत् तदयुक्तं प्रमाणबाधादित्याह—

यथास्वं हेतुभिः शास्त्रैः प्रत्यक्षैरपि योगिनाम् ॥
प्रसिद्धानध्वनः शुद्धान्प्रत्याचष्टे कथं सुधीः ।

अत्र च शुद्धाध्वन इत्युपलक्षणं अशुद्धानामपि तत्वादीनां ततश्च शुद्धाशुद्धरूपस्य जगतः असत्यताभ्युपगमः सर्वप्रमाणबाधित इति तद्वादिनो दुर्बुद्धय एवेति भावः ।

तथा हि—

विशिष्टे परमोदारदातरीशे यथागमम् ॥१४८॥
प्रवृत्तिरूपभोगाय मोक्षाय च निगद्यते ।

शास्त्रतस्तावद्भोगमोक्षप्रदे शिवे सिद्धे सति शास्त्रोपदिष्टक्रमेणैव भोगार्थं मोक्षार्थं वा आत्मनां प्रवृत्तिर्यथाऽधिकारं दृश्यते ॥

किञ्च । भोगस्थानमपि साक्षाच्छिवकर्तृकमत्यन्तशुद्धं शास्त्रेषु श्रूयत इति दर्शयितुं श्रीमन्मतङ्गसूत्रं पठति ।

सदाशिवपदं योगाच्चर्यातो वाऽथ दीक्षया ॥
प्राप्यते चित्तभेदेन मोक्षो वाऽथ चतुष्टयात् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

चित्तभेदशब्देन अत्र ज्ञानं विवक्षितम् । ततश्च शुद्धाध्वनि कर्मण: प्रगमासंभवात् तज्जन्यस्य च भोगस्य सुखदु:खमोहरूपत्वेन अशुद्धत्वात्सदाशिवादिभुवनवर्त्यपरमोक्षसंज्ञ: शुद्धभोग: । परमोक्षश्च शिवसाम्यरूपो योगादिसहकृतदीक्षया प्राप्यते । तत्र मलपरिपाकमान्द्ये भौतिकदीक्षाभाजां भोगानन्तरं मोक्षप्राप्ति: विशिष्टमलपरिपाकवतां नैष्ठिकदीक्षाभाजां शरीरपातानन्तरं। सद्यो निर्वाणदीक्षाभाजां च तदनन्तरमेव मोक्षप्राप्ति: । ननु अस्मिन्सूत्रे दीक्षाचर्याज्ञानयोगाख्यानि चत्वार्यपि समविकल्पानि भोगमोक्षसाधनानीति प्रतीयन्ते । नैवं वाक्यार्थानभिज्ञानात् । एवं हि तत्र वाक्यार्थ: । सदाशिवपदस्य अत्र उपलक्षणत्वात् तत्तद्भुवनेश्वरसाक्षात्कारफलाद्योगात् तत्तदाराधनात्मिकया वा चर्यया तत्तद्भुवनयोजनात्मिकया दीक्षया च तत्तद्भुवनेश्वरस्वरूपनिष्ठेन च ज्ञानेन तत्तद्भुवनेषु प्राप्तिर्भवत्येव । न तु समविकल्पतया । ज्ञानादिष्वपि दीक्षया विनाऽनधिकारात् तस्या एव प्राधान्यं यत: । मोक्षो वाऽथ चतुष्टयात् अस्मात्समुच्चितान्नैकस्मात् भोगो वेति वा शब्दार्थ: । तथा च चर्यायोगयोस्तावत् ज्ञानं विनानुष्ठानमेव नोपपन्नं न ह्यज्ञातेऽर्थे योग: चर्या वा संभवति । ज्ञानमपि द्रव्यत्वान्मलादिबन्धानां

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

चक्षुषः पटलानामिव चक्षुर्वैद्यव्यापाराद्दीक्षाख्यमीश्वरव्यापारं विना न तेभ्यः पुंसां मोक्षं कर्तुं क्षममित्युक्तम् । अतो दीक्षैव मोक्षहेतुः । उक्तं च तत्रैव प्रकरणान्तरे । तस्मान्मन्त्रक्रियामुख्या सेश्वरी भुक्तिमुक्तिदा इति । श्रीमत्षट्साहस्रिकायामपि 'दीक्षैव मोक्षदा पुंसां चिदभिव्यक्तिकारिणी' इति ॥

अत्र च सदाशिवपदस्य भोगाधिकरणत्वं श्रूयते । इत्याह ।

इति भोगः समाख्यातः सदाशिवपदं महत् ॥

भोगशब्देन उपचारात् भोगाधिकरणमुच्यते । सदाशिवपदमित्यपि शुद्धाध्वभुवनोपलक्षणमित्युक्तम् ॥ १४७ ॥

अस्य च भुवनरूपत्वेन कार्यत्वात् शुद्धाध्वत्वाच्च बिन्दुरेव उपादानकारणतया सिद्ध इत्युक्तमित्यभिप्रायेणाह ।

न तत्र मायोपादानं तनुभोगादिजायते ।
विशुद्धत्वादतः सिद्धः शुद्धाध्वा चोपभुक्तये ॥

तत्र सदाशिवपदे इति ॥ १४८ ॥

अन्यथाऽपि शुद्धाध्वसाधनायाह—

किञ्च मायाप्रयोज्येन कर्त्रा केनाप्यधिष्ठिता ।
उपादानं कलादीनां कलाव्यासस्वरूपिणी ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

यथा मृत्कलशादीनां कुलालेन तथाप्यसौ ।

सत्कार्यपक्षाश्रयणेन कलादिपृथिव्यन्तं कार्यं कला: ताभि: शक्तिरूपाभिराश्रयत्वेन व्याप्यत इति कलाव्याप्तस्वरूपिणी माया मृदादिवदशुद्धत्वात् शिवप्रयोज्येन कर्त्रा क्षोभ्यते । न तु बिन्दुवत्साक्षाच्छिवेनेत्युक्तम् । 'शुद्धेऽध्वनि शिव: कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुरिति ॥

कुलालस्यापि शिवप्रयोज्यत्वं दर्शयति **तथा हीति ॥**

प्रयोज्यः पशुभावेन कर्ता हेतुर्महेश्वरः ॥१५०॥

पशुत्वादेव कुलाल: प्रयोज्य: कर्ता । निर्मलत्वाच्छिव: प्रयोजककर्ता इत्यर्थ: ॥ १५० ॥

तथा हि—

अज्ञो जन्तुरनीशोयमात्मा कार्येऽपि कीर्तितः ।
ईश्वरप्रेरितः कुर्याच्छुभं वा यदि वाशुभम् ॥

इत्थं दृष्टान्तं प्रसाध्य दार्ष्टान्तिके योजयति—

प्रयोज्यत्वाच्छरीरादियुक्तोऽनन्तः कुलालवत् ।
मायायाः क्षोभको येन शरीरेणेन्द्रियेण च ॥

देशादिना स सिद्धोऽध्वा विशुद्धः शिवशासने ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

येनेति । यन्मयेनेत्यर्थः । देशादिनेति । भुवनाद्यात्मना-ऽऽश्रयेण आदिग्रहणात् प्रागुक्तेन सविकल्पकज्ञानहेतुना शब्देन च युक्तोऽनन्तः कर्ता । स शुद्धोऽध्वा शिवशास्त्रे सिद्ध इति ॥

इत्थं मतान्तरनिराकरणेन परिग्रहशक्तिरूपां शुद्धाध्वो-पादानभूतां अचेतनां परबिन्दुसंज्ञां महामायां प्रसाध्य मतान्तरेण अशुद्धाध्वनोऽपि बिन्दूपादानत्वं मायायाश्च कार्यत्वमुपन्यस्यति ॥

अवस्थामपरे बिन्दोर्मायामाहुर्विपश्चितः ॥
कलाद्यासस्वरूपा च पुद्गलाधिष्ठिता च यत् ।

यद्यस्माच्छुद्धविद्यातत्वात् मायाऽपि बैन्दवीभिः कला-भिर्व्याप्ता पश्चात्साऽधिष्ठिता च तस्मात्तामपि बिन्दोरेवावस्थां कार्यरूपां सूक्ष्मां परिणातिमाहुः ।

तथैव प्रकृतिस्तेषां स्थूला सूक्ष्मा परेत्यसौ ॥
महामाया भवेत्त्रेधा तत्र स्थूला गुणात्मिका ।
बुद्ध्यादिभोग्यजननी प्रकृतिः पुरुषस्य सा ॥

प्रकृतिमपि तस्यैव स्थूलं अवस्थान्तरमाहुः । एवं तेषां बिन्द्वेकोपादानवादिनाम् सा महामाया स्थूलसूक्ष्मपरभेदेन

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

त्रिधा भिद्यते स्थूला सा बिन्द्ववस्था सत्वरजस्तमोरूपा पुरुषस्य बुध्यादीनि भोगसाधनानि तत्वानि भोग्यांश्च विषयान् परम्परया उत्पादयन्ती प्रकृतिरुच्यते ॥ १५५ ॥

सूक्ष्मा कलादितत्वानामविभागस्वरूपिणी ।
जननी मोहिनी माया सर्वाशुद्धाध्वकारणम् ॥

सूक्ष्मा तु मायासंज्ञा भोक्तृत्वहेतूनां कलादितत्वानां सर्वस्य च प्रकृत्यादेरपि तत्वभुवनात्मनः तद्वर्तिनश्च जगतः साक्षात्परम्परया च कारणं भवति ॥ १५६ ॥

किञ्च ।

मन्त्रयोनिः परा माया नित्या कुण्डलिनी तु या ।
उपादानं शरीराणां विद्याविद्येश्वरात्मनाम् ॥

परा तु मायोपादानमिति । मायायाश्च उपादानभूता महामायेत्यर्थः । सा च नित्या परमकारणत्वात् ॥ १५७ ॥

ततश्च ।

कार्यात्मिका सा मायेयं परिणामवती च यत् ।
शरीरेन्द्रियसंयुक्तं कर्तारं साधयेत्ततः ॥१५८॥

एवञ्च ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

विशुद्धस्याध्वनः सिद्धिरनिवार्याऽवतिष्ठते ।
येषां माया मते नित्या कलाविद्यादिकारणम् ॥

न तेषामसितो मार्गः कलाशुद्ध्या विशुद्ध्यति ।

इत्थं परमतेन मायायाः कार्यत्वं प्रसाध्य तन्मतेनैव मायाया अनित्यत्वे दूषणमाह-- येषामिति । मायाया अनित्यत्वेन शुद्धाध्वोपादानत्वानभ्युपगमे बिन्दुकार्यभूत-कलाध्वशुद्ध्या मायाकार्यस्य अशुद्धस्याध्वनः शुद्धिर्न भवेत् । अन्यस्य शुद्ध्या अन्यस्य शुध्ययोगात् । ततः तच्छुद्ध्यन्यथानुपपत्त्या शुद्धाध्वापि बिन्दुकार्य एवाभ्युपगन्तव्यः ॥

एतदेवाह—

कला हि शोधिताः पञ्च निवृत्याद्या विशुद्धये॥
तत्वादीनामतो बिन्दोः कार्यमध्वाविशेषतः ।

बिन्दुकार्यत्वे ह्युपादानभूतकलाशुद्ध्या सर्वस्य तत्वादेः शुद्धिरनिवार्येति भावः ।

ननु व्यापिकानां कलानां शुद्ध्या व्याप्यस्य तत्वादेः शुद्धिर्भविष्यतीत्यत आह—

न तु व्यापकमात्राणां शुद्ध्या शुद्धिर्मताऽध्वसु॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अनुपादानरूपाणां कलानां नित्यशुद्धयोः ।
शिवशक्त्योर्विशुद्ध्यैव सदाशुद्धिप्रसङ्गतः ॥
इत्याख्याता महामाया सर्वाध्वप्रकृतिः परा ।
आचार्यैस्तैरशेषाध्वकार्यवादविचक्षणैः ॥१६३॥

अत्र च मायाया अनित्यत्वे प्रमाणाभावात् शुद्धस्य बिन्दोः अशुद्धोपादानत्वायोगात् नित्यत्वश्रुतिविरोधाच्चायं पक्षः प्रयत्नेन निराकृत इति मत्वा सिद्धान्तज्ञानिनामाचार्याणां मतेन मायाया नित्यत्वसाधनायाह ।

अन्ये तु कथयन्त्यत्र मायामध्वस्वनश्वरीम् ।
उपादानं कलादीनामाभिव्याप्ताश्च बिन्दुना ॥

तदुक्तं श्रीमत्स्वायंभुवादौ । मायातत्त्वं जगद्बीजमविनाश्यव्ययात्मकम् इत्यादि । श्रीमद्रौरवेऽपि— 'विद्याराजाधिराजेशो मायां विक्षोभ्य मन्त्रराट् । कलामुत्पादयामास' इत्यादि ॥ १६४ ॥

ननु मायाया अकार्यत्वेऽपि अशुद्धाध्वनो व्यापकमात्रकलाशुद्ध्या शुद्धिर्भवेदिति चेदतिप्रसङ्गादित्युक्तम् ।

अत आह—

शुद्धिश्च तादृशी ज्ञेया तयोरागमवेदिभिः ।
यया व्यापकशुद्ध्यैव विशुद्धिरितराश्रया ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

व्यापककलाशुद्धया व्याप्यस्य अध्वमात्रस्य शुद्धिर्दीक्षायां कर्मभोजनादिद्वारेण उपपद्यते इत्यागमेषु श्रूयते । अयं चात्राभिप्रायः कर्मसद्भावे ह्यात्मनां कलादिकोऽशुद्धाध्वा बन्धत्वेनावतिष्ठते तस्य शुद्धिः तान्प्रति बन्धकत्वनिवृत्तिरेवाभिमता सा च मलपरिपाकयुक्तस्य दीक्षया कर्मक्षयादुपजायते । तदुक्तं श्रीमत्किरणे । 'अनेकभाविकं कर्म दग्ध बीजमिवाणुभिः । भविष्यदपि संरुद्धं येनेदं तद्धि भोगतः' इति श्रीमत्स्वायंभुवेऽपि । 'धर्माधर्मक्षयकरी दीक्षा' इति अतश्च सर्वेष्वध्वसु प्रत्येकमितराध्वान्तर्भावेन भोगभोजनादिरूपा दीक्षोपपद्यते । इति व्यापककलाध्वशुद्धया व्याप्यस्य अशुद्धस्यापि तत्त्वभुवनादेः अध्वनः साधारणरूपस्य तं प्रति बन्धकत्वनिवृत्तिलक्षणा शुद्धिरुपपद्यत इति न कश्चिद्दोषः ॥

इत्थं मायाया नित्यत्वेऽपि दोषाभावमुक्त्वा पुनरपि विन्दुमेव विशेषयति ।

मन्त्रयोनिर्महामाया या परिग्रहवर्तिनी ।
शिवस्य शक्तिराक्रान्ता यया सर्वेऽपि पुद्गलाः ॥

वाच्यमन्त्राणां उत्पत्त्ययोगात् वाचकमन्त्राणां शब्दोपादानत्वेन योनिः महामाया सा च शिवस्य परिग्रहशक्तिरु-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

च्यते । यथा सर्वेऽपि पशवः प्रोक्तवन्नादादिद्वारेण अधिष्ठिताः ॥ १६६ ॥

किञ्च,

सेयं क्रियात्मिका शक्तिरीश्वरी सर्वदोदिता ।
वर्तमाना पशुष्वेव पाशत्वेन व्यवस्थिता ॥

एषा च सर्वदेश्वरस्य क्रियाशक्त्यधिष्ठितत्वात् शुद्धकार्योत्पादनार्थं आत्मनां च क्रियाशक्त्यविवेकेन स्थितत्वाच्च कैश्चिद्भ्रान्त्या क्रियाशक्तिरैश्वरीति प्रोक्ता न तु परमार्थतः चित्समवायिनी क्रियाशक्तिः उपादानत्वेन अचेतनत्वादित्युक्तम् अत एव मुक्ताणुषु न प्रवर्तते पशुष्वेव वर्तमानत्वादियमपि पाशतयैव स्थिता न तु पाशातीतशिवसमवायेनेति ।

अतश्च ।

पशून्वर्तयते नित्यं नानायोनिष्वनिश्चिता ।

सेयं क्रियाशक्तिर्व्यतिरेकेण ज्ञाता सती पशून् अशुद्धासु योनिषु योजयति तद्विवेके तु नाशुद्धयोनिप्राप्तिरित्यर्थः ॥

किं च ।

स्वपरामर्शवीर्येण भोगमोक्षौ प्रयच्छति ॥

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

स्वकीयेन परामर्शज्ञानात्मना वीर्येण भोगमोक्षौ प्रयच्छति भोगमोक्षयोः परंपरया उपकारिणीभवतीत्यर्थः ॥

माया तु भोगोपकारिकाऽनात्मादिषु आत्मादिज्ञानहेतुत्वात् तत्रास्य भोगोपकारित्वं दर्शयति ॥

सा भोगसाधनोपायप्रत्ययोदयहेतुना ।
शब्दानुवेधेन सदा मोहयेदविवेचिता ॥ १६९ ॥

अविवेचितस्वरूपा महामाया भोगसाधनग्रहणोपायभूतसविकल्पकज्ञानोत्पत्तिहेतुना शब्दानुवेधेन सर्वदा पशून्मोहयति ॥ १६९ ॥

तदानीं च ।

सर्वथैवामृतप्राप्तेः पृथक्कारं प्रतन्वती ।
ततोऽभूद्विषयाभोगप्रीतिलालसचेतसः ॥

विषयाभोगश्रद्धालोः पुंसः सर्वथा मोक्षप्राप्तेः बहिर्भावं तदानीं करोतीत्यथः ॥ १७० ॥

मोक्षोपकारकत्वमपि दर्शयति—

ज्ञानं परामृतोपायहेतुः परिकरः पशोः ।

परमोक्षप्राप्त्युपायस्य दीक्षाख्यस्य तदुत्तरकालानुष्ठेयस्य च नित्यादिकर्मणः कारणं परिच्छेदज्ञानमेव अज्ञातविषये

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

ऽनुष्ठानासंभवात् । निर्बीजदीक्षायामपि आचार्यस्य ज्ञान-प्रधानत्वात् ॥

तस्य च शिवादिवस्तुविषयकज्ञानस्य शास्त्रद्वारेण बिन्दुरेव संपादक इत्याह ।

तच्च शब्दानुवेधेन शब्दराशेरभूदसौ ॥ १७१ ॥

शब्दराशिश्च बिन्दूत्थो बिन्दुर्नादादसावपि ।
बिन्दोरनाहतादेष कारणं शुद्धवर्त्मनः ॥१७२॥

अनाहतबिन्दुरिति शुद्धाध्वयोनेर्महामायाया: संज्ञा । तस्याश्च नादबिन्द्वादिक्रमेण शब्दोत्पत्तिरित्युक्तम् ॥ १७२ ॥

तत्र भोक्तृतया भोगैश्शरीरेन्द्रियगोचरैः ।
मलः कर्म च माया च विशुद्धमनुमीयते ॥

तत्र च विद्येश्वरादीनां भोक्तृत्वश्रुते: भोगस्य शरीराद्यविनाभावादशुद्धभोगसाधनशरीरादिहेतूनां मलमायकर्मणां तत्रासंभवात् शुद्धभोगसाधनै: शरीरादिभि: भोक्तृत्वहेतु: शुद्धोऽधिकारमलश्शुद्धं चेश्वरसेवात्मकं सहकारि कर्म शुद्धा च माया शरीराद्युपादानमनुमीयते । तयोश्च अधिकारमलेश्वरसेवात्मककर्मणोर्महामायाभुवनप्राप्ति: तत्कारणभूतदीक्षा

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

त्वा संपादिका । मायोत्तीर्णानां विच्छिन्नावारकमलानामेव तत्संभवात् ॥ १७३ ॥

एतदेवाह—

मायैव कारणं शुद्धाशुद्धयोर्मलकर्मणोः ।

अशुद्धस्य तु अनात्मादावात्माद्यभिमानरूपस्य पुंस्त्वमलस्याशुद्धभोगहेतोश्च अश्वमेधब्रह्महत्यात्माद्यनुष्ठानरूपस्य कर्मणोऽशुद्धमायाकार्यसंपर्कः कारणमित्याह—

अशुद्धयोरशुद्धैव मायाऽतो द्विविधा मता ॥

न तु आणवमलस्य सा हेतुरिति व्याख्येयं तस्यानाद्यावारकत्वेन श्रवणात् आदिमत्वे च आवरणकारणासंभवात् । ननु कर्माप्येवं अनादिकमिति श्रुतेः कर्म सद्भाव एव माया प्रवृत्तेश्च कथं कर्मणः माया कारणमुच्यते । सत्यं प्रवाहानादिरेव कर्मशरीरप्रबन्धः । कर्माभावे मायायाश्च प्रवृत्तिरेव । तथापि कर्मानुष्ठानस्य देहवतामेव संभवात् वासनारूपस्य च कर्मणः बुद्धिद्वारेण मायास्थत्वात् तथोक्तमित्यविरोधः । कर्मापि कृष्यादिकर्मवत्प्रकृतिसंस्कारकत्वात् पुरुषसंस्कारकत्वे तस्य विकारित्वप्रसङ्गात् बुद्धौ गुणत्वेन वर्तत इत्युक्तं श्रीमन्मतङ्गादौ । अतश्च मायामहामायात्मकद्वयं नित्यसिद्धामित्याह ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

मायात इति। एवं विसदृशकार्यत्वात् मायाया बिन्दुकार्यत्वं न संभवतीति भावः ॥ १७४ ॥

बिन्दोर्विवेके सहसा छिद्यते मलकम्बुकः ।

मलस्य द्रव्यत्वेन ज्ञानानिवर्त्यतया उक्तत्वात् दीक्षया क्षपितमलानामेव शुद्धाध्वभुवनप्राप्तेः शास्त्रद्वारेण महामाया-पुरुषविवेकज्ञानस्य च संभवाच्च अधिकारमलक्षयः तद्विवेके भवति ॥

मायापुरुषविवेके तु धर्माधर्मतुषक्षयः ॥ १७५ ॥

यदाहुः— ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते इति । ततश्च कर्मक्षयेऽपि परिणतमलानां विज्ञानकेवलत्वमेव । प्रकृतिपुरुषविवेके तु तदपि नास्त्येव यदुक्तं सिद्धगुरुभिः । गुणतत्त्वोर्ध्वभोगस्य कर्मणोऽनुपलब्धितः । कैवल्यमपि सांख्यानां नैव युक्तमसंक्षयात् इति ॥ १७५ ॥

ततश्च,

उत्तीर्णमायमात्मानं महामायानुषाङ्गिणम् ।
उद्दिश्य शक्तिरीशस्य बिन्दोः क्षोभाय वर्तते ॥

साधकदीक्षाभाजं शुद्धभोगाभिलाषिणं प्रति शिवशक्ति

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

बिन्दोः क्षुब्धात् शरीरादीन्युत्पादयतीत्यर्थः । स च शक्त्या क्षोभितः ॥ १७६ ॥

यथोदधिरूपर्येव विकरोत्यनिलेरणात् ।
तथैकदेशतो बिन्दुः शक्तेर्व्याप्नोति चाखिलम् ॥

शक्तेः प्रेरणात् घृतकीटन्यायेन एकदेशेन बिन्दुः विकरोति न तु क्षीरदधिन्यायेन सर्वात्मना तथा सत्यनित्यत्वप्रसङ्गादनवस्थाप्रसङ्गाच्चेत्यर्थः । किं च स्वकार्यरूपाभिः कलाभिः प्रागुक्तं विश्वं व्याप्नोति चेत्यर्थः ॥ १७७ ॥

अयं च न्यायोऽन्यत्रापि समान इत्याह—

एवं मायैकदेशेन विकरोति तथाखिलम् ।
व्याप्नोति कार्यमात्मीयं तथैवाव्यक्तमिष्यते ॥

अयमत्र बिन्दोः मायाप्रधानयोर्विशेषः यत् स्वकार्यमेवैते व्याप्नुवतः । न तु स्वस्मादूर्ध्वं । तत्र प्रगमासंभवात् अतः शुद्धस्य तु अशुद्धाध्वन्यपि व्यापकत्वात्प्रगमः संभवत्येव ॥
इदानीं बिन्दोरवस्थान्तराधिष्ठानादौपाधिकः शिवस्य लयादिभेद इत्याह —

तत्राक्षुब्धे भवेद्भोगो बिन्दावानन्दरूपिणि ।
क्षुब्धेऽधिकारो देवस्य लयोतिक्रान्तबिन्दुकः ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तत्रानन्दरूपिणि समन्ताद्व्याप्तिसमृद्धिभाजि विन्दाव-क्षुब्धे शिवशक्त्या क्षोभनिमित्तं विषयीकृते प्रसवौन्मुख्य-भाजि सति शिवशक्तेरुद्योगात्पालनात्मको भोगो भवति क्षुब्धे तु उत्पादितकार्ये शक्तेर्व्यापृतत्वादधिकारः । उपसंहृत-कार्ये स्वरूपनिष्ठे शक्तेरप्युपसंहृतव्यापारत्वाल्लयः ॥ १७९ ॥

ततश्च शिवशक्त्योर्व्यापारभेदादौपचारिको भेद इत्याह—

एकैव खलु चिच्छक्तिश्शिवस्य समवायिनी ।
त्रिविधोपाधिसंभेदाल्लयभोगाधिकारिणी ॥
तयैनयाभिसंबन्धादेको देवस्त्रिधा भवेत् ।
शिवस्सदाशिवोऽधीशो लयभोगाधिकारवान् ॥

यदुक्तम् अधिकारी स भोगी च लयी स्यादुपचारतः । इति । अनेन बिन्दुपरीक्षोपसंहारेण शक्तिपरीक्षोपक्षिप्ता इति मन्तव्यम् ॥ १८० ॥

अथ शक्तिलक्षणमाह—

शक्तिरप्रतिघोदारमरीचिनिचयात्मिका ।
नित्योदितानवच्छिन्ना निर्विकल्पस्वरूपिणी ॥
निरावरणनिर्द्वन्द्वनिरुपादानवैभवा ।
विविधोपाधिसम्बन्धविवर्तभिदुरोदया ॥१८२।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

शान्तोदितप्रपञ्चादिबिन्दुव्याप्तिपटीयसी ।
परानपेक्षानन्यात्मप्रकाश्या सर्वतोमुखी ॥१८३॥

आदिमध्यान्तरहिता रहिता सर्वबंधनैः ।
निष्ठा काष्ठा परा सूक्ष्मा वस्तुमात्रातिलालसा ॥

मरीचिनिचयोऽत्र ज्ञानक्रियासमृद्धिः । लयावस्थायामस्या औपचारिकभेदस्याप्यभावात् । निर्विकल्पस्वरूपिणी सा कथिता । **विविधेति** । विचित्रकार्योपाधिसंबन्धादपारमर्थिकेन भेदशीलोदयेन युक्ता कृत्यभेदाधिकारावस्थायां भिन्नेव लक्ष्यमाणेत्यर्थः । किंच सा प्रोक्तप्रपञ्चादिभूतबिन्दुव्याप्तिदक्षा मलरहितत्वेन परानपेक्षत्वादनन्यप्रकाश्या । अत एव आत्मशक्तिवैलक्षण्येन सर्वबन्धनविरहादिगुणयुक्ता । **काष्ठा** निरातिशया । **निष्ठा** अतिशयावधिभूता । **परा सूक्ष्मा** अत्यन्तसूक्ष्मा अतिलालसा सर्वानुग्रहणशीला च बोद्धव्या । सा च शिवस्य ज्ञानक्रियात्मकं चैतन्यमेवेत्याह—

चितिरेव मताम्लानमहिमा परमेष्ठिनः ।
शिवस्यानाहितापूर्वविशेषस्यैव सन्निधौ ॥१८५॥

तयैतयाभिसम्बन्धविशेषान्नित्यरूपया ।
विकरोति विचित्राभिर्वृत्तिभिस्स्थगयन्निव ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

बिन्दुरापूरयन्नादैराणवं चिन्नभो मुहुः ।
सरिद्वानभिसम्बन्धादिन्दुनार्कस्य सन्निधौ ॥
विकरोति यथा लोलैः कल्लोलैर्नादयन्नभः ।

कर्तृभूतस्य शिवस्य सन्निधौ करणभूतया शक्त्या संबन्धाद्बिन्दुः कार्योत्पादक इत्याह । शिवस्येति । बिन्दुः प्रतिपुरुषं भिन्नैर्नादैरात्मनां चैतन्यमापूरयतीत्युक्तम् प्रागेव । नन्विन्द्रियादिरहितस्य कर्तृत्वं न युज्यते । तन्न स्वदेहस्पन्दादावात्मनश्शक्तिमात्रस्य करणस्य दर्शनात् । अस्याश्च शिवसमवायेन परिणामाभावात् कार्यभेदादौपचारिक एवेच्छाज्ञानक्रियादिभेद इत्याह ।

सैषा शिवाश्रया शक्तिरमोघा बलशालिनी ॥
एकानेकविभोगेव कार्यभेदाद्विभाव्यते ।
यथैका सवितुः शक्तिर्दानादानादिकर्मभिः ॥

एतदेव प्रपञ्चयति—

इच्छाकार्यमनिच्छापि कुर्वाणेच्छाभिदव्यया ।
ज्ञानमज्ञानरूपैवमक्रियापि क्रिया तथा ॥१९०॥

ज्ञेयकार्याद्युपाधिभेदात्तस्या ज्ञानक्रियादिभेद इत्यर्थः ॥

किं बहुना ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

यद्यस्याः कार्यमाम्नायलोकाभ्यामवधारितम् ।
तदेतद्रूपिणी शक्तिः कुरुतेऽचिन्त्यवैभवा ॥

अनेनास्याः सर्वाधिष्ठानमुक्तम् । यदाहुः 'न सा भावकला काचित्सन्तानद्वयवर्तिनी । व्याप्त्री शिवकला यस्यामधिष्ठात्री न विद्यते ॥' इति ॥ अविकारेण सर्वार्थकारित्वमेव दृष्टान्तेन द्रढयति ॥

कामानपि बहूनेकः कल्पवृक्षः प्रयच्छति ।
चिन्तामणिश्च विविधानचिन्त्यमहिमा यथा ॥

तथाऽनाहितसंस्कारविशेषैकस्वरूपिणी ।
चिदचिन्त्या विभोः शक्तिरशेषार्थक्रियाविधौ ॥

चेतनत्वान्नास्या विकार इत्याह—

न जायते न म्रियते क्षीयते न च वर्धते ।
चितिः शक्तिः प्रकाशत्वादजडत्वाच्च यत्पुनः ॥

अमुमेवार्थं व्यतिरेकेण साधयति—यत्पुनरिति ।

उत्पद्यते नश्यति वा चिनोत्यपचिनोति च ।
तदप्रकाशरूपं वा जडं वा दृश्यते यथा ॥
शरीरादि तथा नासौ तस्मान्नैषा विकारिणी ।

यतोऽसावप्रकाशरूपा जडा च न भवति ततो न विका-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

रिणीत्यर्थः। एवमस्याः क्षीरदधिन्यायेन सर्वात्मना परं विकारो निराकृतः इदानीमुक्ताभ्यामेव हेतुभ्यामेकदेशपरिणामोऽपि नास्तीत्याह —

ताभ्यामेवोपदेशाभ्यां परिणामो निराकृतः ॥
बोधशक्तेरबोधस्य परिणामो हि दृश्यते ।

एतदेव प्रपञ्चयति—

परिणामाऽपरिम्लानं शाश्वतं शिवमाश्रिता ॥
समवायेन तादात्म्यान्न हि चित्परिणामिनी ।

परिणामहीनं नित्यं चेतनं शिवं समवायेन तादात्म्यलक्षणसम्बन्धेनाश्रिता चिच्छक्तिर्न परिणामिनी भवितुमर्हति । यच्छ्रूयते 'शक्तिर्नाऽचेतनाचित' इति । ततश्च ।

नित्यैषाऽशेषकार्याणाङ्कारणत्वाद्यथेश्वरः॥१९८॥
सत्वे कारणशून्यत्वादपि बिन्दुवदिष्यते ।

अस्याश्चानित्यत्वेऽनवस्थाप्रसङ्ग इति भावः ।

तथा हि तां समाश्रित्य सन्तोऽन्ये शाश्वती सती॥
यत्सिद्धौ जगतः सिद्धिर्यदसिद्धौ न किंचन ।
तत्सत्ता साध्यते कस्य केन वा प्रतिपाद्यते ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

यस्याः उपादानभूतबिन्द्वाद्यधिष्ठातृकर्तृशक्तेः सद्भाव एव शुद्धाशुद्धमयस्य कार्यरूपस्य जगतः सिद्धिः । नान्यथा तस्याः सत्ता केनान्येन प्रमाणेन साध्यते । कार्योत्पत्त्यन्यथानुपपत्त्यैव सा सिद्धेत्यभिप्रायः ॥ २०० ॥

इत्थं शक्तिं प्रसाध्य चिदचिदद्वैतवादिनां मतमुपन्यस्यति —

तामेतामद्वयामेके कीर्तयन्ति विपश्चितः ।
चितिं सदसदाकारविवर्तोल्लासशालिनीम् ॥

विपश्चित इत्याक्षेपे एवं हि ते मन्यन्ते । शक्तिरेव चिद्रूपा सत्यभूता । सा च विवर्ततया शुद्धाशुद्धभुवनादिरूपानर्थानसत्यभूतान्प्रकाशयति । ततश्च द्वैतप्रतिभासो द्विचन्द्रादिज्ञानवद्भ्रान्त एवेति ।

एतदेव दृष्टान्तेनाह —

यथा रज्जुरहिच्छिद्रमालाविभ्रमकारिणी ।
न तानुत्पादयत्यर्थानसतः प्रथयत्यसौ ॥ २०२ ॥
ज्ञानमात्रं तथैवेयमेकानेकायते भ्रमात् ।

ततश्च ।

सेयं भ्रान्तिरनालम्बा सर्वन्यायविरोधिनी ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

विचाराल्लूनमूलत्वादहेतुर्बन्धमोक्षयोः ।
तस्मान्न बन्धो बन्धोऽन्यो बन्धकश्च विचारतः ॥
नित्यमुक्ताद्वयानन्तसंविदेवास्ति केवलम् ।
कथं पुनरयं भेदप्रतिभासोऽपि दृश्यते ।
व्यवहारस्तु भेदात्मा विज्ञेयो वटयक्षवत् ॥

कथमप्रामाण्यं भेदावभासस्यात आह—

तथाहि भेदो भावानां न प्रत्यक्षोक्षधीर्यतः ।

कुत इत्यत्राह—अक्षधीरिति ।

बालमूकादिविज्ञानतुल्यैवाकल्पनार्थजा ॥२०६॥

निर्विकल्पकविज्ञानस्यैवार्थसामर्थ्यजनितस्य प्रत्यक्षत्वात्तस्यैव प्रामाण्याभ्युपगमात् भेदस्य च विकल्परूपत्वान्न प्रत्यक्षसिद्धत्वमित्यर्थः ।

किं च ।

सा विधात्री पदार्थानां न निषेधात्रि किंचन ।

तदुक्तं आहुर्विधातृ प्रत्यक्ष न निषेधृ विपश्चित इति । ततश्च भेदस्येतरेतराभावग्रहणपूर्वकत्वाद्भावविषयेण प्रत्यक्षेण ग्रहणं नोपपद्यत इति भावः । सविकल्पकं तु ।

यद्विशेषणविज्ञानं शब्दसंस्कारपूर्वकम् ॥२०७॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

देशकालाद्यपेक्षाक्षैरुदपादि न तत्पुनः ।
अर्थसामर्थ्यजं ज्ञानं स्मृतिसङ्कल्पवन्मतम् ॥

यत्पुनः शब्दानुवेधेन सविकल्पकं ज्ञानं देशकालाद्यपेक्षाक्षैरुत्पाद्यते । तदिदं देशकालाद्यपेक्षत्वान्नार्थसामर्थ्यजन्यं स्मृतिप्रतिभासादिवत्ततस्तत्प्रमाणमिष्यते । यदाहुः । कल्पनापोढमभ्रान्तं प्रत्यक्षमिति । अत एव ।

नानुमानागमौ तत्र प्रमाणं तदभावतः ।

प्रत्यक्षविषयत्वाभावतो भावानां भेदे नानुमानागमावपि प्रमाणं भवितुमर्हतः ।

तथा हि —

प्रत्यक्ष एव तावर्थे विकल्पविषयावपि ॥ २०९ ॥

यतस्तावपि प्रत्यक्षासिद्ध एवार्थे विकल्पमुत्पादयन्तौ प्रमाणीभवितुमर्हतः । संबन्धग्रहणादेः प्रत्यक्षपूर्वकत्वाद्विकल्परूपत्वाच्च भेदस्य तु प्रत्यक्षेण ग्रहणं न संभवतीत्युक्तम् । अतः स्वप्नादिज्ञानवदसत्यभूत एवायं भेदप्रतिभासः ।

यत एवायम् ।

स्वोत्थैर्निबध्यते तस्माच्छङ्कापाशैर्विमूढधीः ।
मुच्यते तेभ्य एवायं बन्धमोक्षौ न वस्तुतः ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

इत्थं तन्मतमुपन्यस्य सिद्धान्तमुपक्षिपति ।

इत्यद्वैतग्रहाविष्टाः प्रलपन्तो दयालुभिः ।
गुरुभिः प्रतिबोध्यन्ते सिद्धान्तागमदायिभिः ॥

कथं बोध्यन्ते अत आह—

यद्यद्वयेयं संवित्तिः प्रमाणैर्व्यावहारिकैः ।
साध्येत तैरेव दृढं तस्याः स्यात्सद्वितीयता ॥

यदि संविदैक्यं लोकस्य व्यवहारसिद्धैः प्रमाणैर्भवद्भिः साध्यते ततस्तैरेव सत्यभूतैरद्वैतहानिः । अथ तान्यप्यसत्यानीष्यन्ते । निष्प्रमाणकत्वादद्वैतासिद्धिरिति भावः । एतदेव प्रपञ्चयितुमनुमानस्वरूपमाह—

प्रसिद्धाः पृथगेवालं धर्मिदृष्टान्तहेतवः ।
अप्रसिद्धस्य धर्मस्य सिध्यै व्याप्त्युपबृंहिताः ॥

दृष्टान्तभूते हि महानसे धूमाग्न्योर्व्याप्तिमविनाभावसम्बन्धं गृहीत्वाऽथ साध्यधर्मिणि पर्वतादौ धूमवत्त्वेन हेतुना प्रसिद्धो वह्निमत्त्वरूपधर्मोऽनुमीयते । ततः पृथगेव भेदेन धर्म्यादयस्सिद्धा अभ्युपगन्तव्याः । तथा हि—

न सिद्धस्साध्यते धर्मो नासिद्धैरपि तैस्तथा ।
सिध्यसिद्धी च संभूय नैकत्र स्थातुमर्हतः ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

न हि सिद्धस्य साधकान्तरापेक्षा नाप्यसिद्धा हेत्वादयस्सिद्धं साधयन्ति अतश्च ।

सपक्षपक्षयोर्भेदे प्रमाणमनुमा भवेत् ।
ऐक्ये हि न तयोर्हेतुसाधर्म्यं तदभावतः ॥

यस्मात्पक्षसपक्षयोरैक्ये हेतुसाधर्म्यं दृष्टान्तसिद्धधूमवत्त्वाख्यहेतुना साध्यधर्मिणि धूमवत्त्वस्य साधर्म्यं न भवति तस्मात्तयोरैक्ये नानुमानात्साध्यसिद्धिः दृष्टान्ताभावे तु व्याप्तिग्रहणमपि न संभवतीत्याह तदभावत इति ।

कस्य केन कथं व्याप्तिरित्यद्वैतप्रसिद्धये ।

इत्थं सत्यद्वैतसिध्यर्थमनुमानाङ्गीकारे भेदोऽवश्यं भावीत्याह--

इत्यद्वैतप्रसिद्धये । इति

प्रयुक्तो भेदमाख्यातिप्रयोगः स्वाङ्गसिद्धये ॥

स्वाङ्गस्य हेत्वादेः सिध्यर्थमित्यर्थः । किं च, संविदेकैकेति संविद्विषयभेदनिषेधे जडविषयो भेदो न निषिध्यत इत्याह—

अद्वयेति निषेधोऽपि चिति युज्येत तन्मते ।
द्वैतभावस्ततोऽन्यत्र सिध्येत्सिद्धावपि ध्रुवम् ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

प्रतिज्ञा भज्यते तेषामाशामात्रविजृम्भिता ।

आगमप्रामाण्यस्वीकारेऽप्यद्वैतहानिरित्याह--

आगमोऽपि पदैस्तैस्तैस्मारितार्थविशेषतः ॥
पदार्थजातं संसर्गविशिष्टं कथयेत्कथम् ।
ग्यद्वयेयं संवित्तिस्स्वेनस्यादभिधित्सिता ॥

यदि स्वेनागमेनाद्वया संवित्तिरभिधित्सिता स्यात्कथमसौ जातिगुणक्रियाद्रव्यवाचिभिर्गौरियं श्वेता गच्छति ग्राममित्यादिभिः पदैः स्मारितार्थविशेषा पदार्थजातसंसर्गरूपां विशिष्टां बुद्धिं जनयेत् । एतदुक्तं भवति । आगमस्य सत्यभूतस्य प्रमाणतयाभ्युपगमे तेन तदवयवैस्तदर्थैश्च द्रव्यादिभिः सत्यैश्च भाव्यम् । अतोऽयमेवाद्वैतविरोध इति । अतश्च ।

आगमः कथमद्वैतमनुमानं च साधयेत् ।
निवार्यमाणमङ्गैः स्वैः अद्वैतक्षपणक्षमैः ॥२२०॥

इदानीं शिवच्छक्तिरेकैव खल्वित्यादीनामद्वैतश्रुतीनां प्रमाणान्तरविरोधान्मुख्यार्थासम्भवं दर्शयितुमाह--

किं च शब्दाः परित्यज्य मुख्यमर्थं विरोधतः ।
वर्तमाना हि दृश्यन्ते गौणेऽर्थे लोकवेदयोः ॥
गौर्ब्राह्मणोऽयमादित्यो यूप इत्येवमादयः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अनुमानस्य त्वविनाभावसम्बन्धलक्षणे व्याप्तिग्रहणे सति प्रमाणत्वेनार्थसाधकत्वमनिवार्यमेवेत्याह ।

नैवं हेतुरदृष्टायां व्याप्तौ साध्यं नसाधयेत् ॥

अतश्च भेदसाधकैरनुमानैर्बाधितत्वादेकत्वश्रुतयः संविदो नित्यत्वव्यापकत्वादिसाहश्यस्तोत्रपरा इत्याह--

अतो हेतुबलाक्रान्ताः श्रुतयो द्वैतमात्मनाम् ।
मुख्यमप्यपहायार्थं नुतिं कुर्वन्ति संविदः ॥

किं च—

प्रत्यक्षमपि गृह्णाति वस्तुनो निर्विकल्पकम् ।
भेदं परेभ्यो व्यावृत्तिरूपं येनोपजायते ॥२२४॥

जायमानेन नामादिविशेषस्मृतिपूर्वकम् ।
सविकल्पमसन्दिग्धं व्यभिचारवर्जितम् ॥

प्रत्यक्षसंज्ञं विज्ञानमन्यथा नोपपद्यते ।

अत्र हि नामप्रमाणादिविशेषस्मरणपूर्वकमुत्पद्यमानं सविकल्पकमपि ज्ञानमसंदिग्धत्वादबाधितत्त्वाच्च प्रत्यक्षतया प्रमाणमेवेष्यते । यदाहुः। ततः परं पुनर्वस्तुधर्मैर्जात्यादिभिर्यया । बुध्यावसीयते साऽपि प्रत्यक्षत्वेन सम्मता इति । ततस्तादृशं प्रत्यक्षज्ञानं येन जायमानेनोत्पद्यते तदपि निर्वि-

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

कल्पकं ज्ञानं वस्तुनः परेभ्यो व्यावृत्तरूपं भेदं गृह्णात्येव । कार्यस्य कारणगुणान्वयात् सत्कार्यवादाभ्युपगमाच्च । तस्य तु भेदग्राहित्वानभ्युपगमे तदुत्तरकालं सविकल्पकज्ञानं नोत्पद्यत इत्याह । अन्यथेति ।

अगृहीतार्थभेदस्य तन्नामादिविशेषवत् ॥२२६॥

ननु भेदस्येतरेतराभावग्रहणपूर्वकत्वाद्भावविषयेण प्रत्यक्षेण ग्रहणं नोपपद्यत इत्युक्तम् । तदयुक्तं सिद्धे हि भेदेऽसावितरेतराभावः । अन्यथा पयोऽर्थीपावकमनुधावेदिति सर्वमञ्जसम् ।

अनुमानस्य साफल्यमपि भेदग्रहे सति ।
व्याप्तिग्रहणसंबन्धे सामान्ये सिद्धसाधनात् ॥

व्याप्तिविज्ञानार्थं भेदग्रहणस्यावश्यं भावात् तत्सद्भाव एवानुमानप्रवृत्तिरित्यर्थः । वस्तुसामान्यमात्रग्रहणे तु तस्य प्रागेव सिद्धत्वाद्धर्मिविशेषणस्य धर्मविशेषसाधनार्थमनुमानं न प्रवर्त इत्याह—सामान्ये सिद्धसाधनादिति ।

अन्यथा भेदसिद्धिमाह—

अपि चान्यत्वमद्वैतभेदयोरभ्युपैति चेत् ।
भेदः सिध्येदथानन्यभाव एवं च साध्यते ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अद्वैतस्य द्वैतान्यस्याभ्युपगमे द्वैताद्वैतात्मकस्य वस्तुद्वयस्यासिद्धिः । अथाद्वैतभेदयोर्द्वैताद्वैतात्मकस्य वस्तुद्वयस्याप्येकत्वमिष्यते यद्येवं भेदस्यैवाद्वैतसंज्ञा भवद्भिरुच्यत इति न वो नास्ति विवादः । यतोऽस्माभिरप्येवं भेद एव साध्यते ।

नन्वेकस्यां रज्जौ सर्पादिभ्रमवदेकस्यामेव संविदिसत्यभूतायामसत्यभूतो वस्तु भेदप्रतिभास इत्युक्तं अत आह ।

न हि दृष्टान्तमात्रेण साध्यसिद्धिर्भवेदतः ।
रज्जूदाहरणं शिष्यसम्मोहायैव केवलम् ॥

केवलस्य दृष्टान्तस्य हेत्वादिभिर्विनाऽर्थसाधकत्वाभावा दृष्टान्तमात्रस्य सत्यत्वेऽप्यद्वैतविरोधात्तदसत्यत्वे दार्ष्टान्तिकभूतायास्संविदोऽप्यसत्यत्वप्रसङ्गाद्रज्जूदाहरणमनर्थकमेवेत्यर्थः । किं च ।

नापि संवित्समा रज्जोर्विशेषानुपलब्धितः ।
विवर्तमाना तैर्भावैर्ज्ञानमात्रनिवर्तकैः ॥ २३० ॥

रज्ज्वादौ हि सर्पादिभ्रमास्सम्यक् ज्ञानोदयान्निवर्तन्ते । ततो बाधितत्वात्सर्पाद्यवभासः तिमिरादिदोषकृतोऽसत्य एव घटपटाद्यर्थप्रकाशस्य तु कालान्तरदेशान्तरयोरपि विशेषा-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

दर्शनात्संज्ञानमात्रव्यतिरेकेण भासमानैरबाधितत्वादेव सत्यभूतैस्तैस्तैर्घटपटादिभावैरुपाधिभूतैस्सह विवर्तमाना स्वयमपि भिन्नेव भासमानाऽऽत्मसंविन्न रज्जुसाम्यं भजते । एतदुक्तं भवति। घटपटादिबाह्यार्थभेदस्सत्य एवात्मसंविदस्तु तत्तदर्थसन्निधौ तत्तदाकारारोपो बुध्यध्यवसायभेदः उपाधिकृत इति। एतच्चोत्तरत्र प्रपञ्चयिष्यते अतश्च तत्तदर्थसन्निधौ जायमानस्य तत्तदाकारस्य बौद्धस्याध्यवसायात्मनो ज्ञानस्यासकृद्भेदेऽपि तत्तदध्यवसातृरूपायास्सर्वदैकरूपेण भासमानाया ग्राहकसंविदो न रूपान्तरपरावृत्तिः अपि तु नित्यत्वमेव चेतनत्वेनाविकारित्वात्ततश्चात्मसंविदो नैका एव एकत्वे भोगसाम्यविमोक्षादिदोषप्रसङ्गादित्युक्तमस्माभिरन्यत्र । अस्याश्चात्मसंविदो बौद्धाध्यवसायाविवेकादनेकरूपताभ्रमो मलहेतुक एव पश्चात्मनामित्याह —

सा तु संविदविज्ञाता तैस्तैर्भावैर्विवर्तते ।
मलोपरुद्धदृक्छक्तेर्नरस्येवोडुराट् पशोः ॥

यथा तिमिररुद्धचक्षुष एकोपीन्दुरनेक इव प्रतिभात्येवं मलरुद्धज्ञानशक्तेरेकैव चेतनात्मिका संविदनेकरूपेव विवर्तत इति ॥ २३१ ॥

यथा च प्रमाणान्तरसिद्धैत्वयस्यापीन्दोरनेकत्वप्रत्ययस्ति-

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

मिरहेतुकः एवं शास्त्रादिसिद्धैक्यस्य गृहीतृरूपस्य ज्ञानस्यानेकाकारताभ्रमः स्वकारणं मलं गमयतीत्याह—

यथा तैमिरिको हेतुसहस्रेणापि तर्कयन् ।
एकमिन्दुमनेकांस्तान् भूयोभूयस्समीक्षते ॥

यथा वा पित्तसंदुष्टरसनः स्वादु तर्कयन् ।
अपि तिक्तं विजानाति पयः करणदोषतः ॥

यथा वासनसंयुक्ते कथ्यमाने च वारिणि ।
विदुषामपि नीलोष्णप्रत्ययावविवेकिनः ॥२३४॥

तथा परीक्षिता सम्यगागमैस्सोपपत्तिकैः ।
विवर्तमाना जातेति नष्टेति विविधेति च ॥

ज्ञानानि वृत्तिं गमयेत्कारणं तिमिरादिवत् ।

स च मलो द्रव्यत्वाच्चक्षुषः पटलादिरिव न ज्ञानमात्रान्निवर्तते । अपि तु चक्षुषः वैद्यव्यापारेण पटलादिरिवेश्वरव्यापारेण दीक्षाख्येनैव निवर्तत इत्याह—

तच्छिवप्रणिधानेन शिवशास्त्रोदितेन च ॥
कर्मणैव निवर्त्येत नान्यथा ज्ञानकोटिभिः ।
तिमिरादिर्यथारोग्यशास्त्रोक्तेनैव कर्मणा ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तन्मलं शिवध्यानेनाङ्गभूतेन सहकृतया शिवशास्त्रोक्तया दीक्षाख्यया क्रिययैव निवर्तते । यदुक्तं श्रीमत्स्वायंभुवे । दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपीति ।

अत्र प्रयोगः ।

मलो ज्ञानानिवर्त्यो भवति । आत्मकरणाच्छादकत्वात् । तिमिरवत् । परमार्थो मलः । मलिनीकरणार्थक्रियाकारित्वात् । यथा काचतिमिरात्मको मलो भ्रमोत्पादकः । इत्थं ग्राहकसंविदो नित्यत्वप्रसङ्गान्मलं तन्निवृत्तिहेतुं चोक्त्वा ग्राह्यस्य प्रपञ्चस्य भेदो वास्तव इत्याह

देशकालनरान्यत्वेप्यन्यथानवभासितः ।
अबाधितप्रमाणैश्च विवर्तस्स्यात्कथं चितेः ॥

प्रपञ्चः किंच मायेयः प्रमाणैरेव साधितः ।

संविदस्त्वनेकाकारताभ्रान्त्यैवेत्युक्तम् । इत्याह ।

तस्माद्विवर्तते संविदणूनामेव बन्धनात् ॥

एतदेव प्रपञ्चयति ।

विवर्तः खलु चिच्छक्तेर्मिथ्यापरिणतिर्यया ।
अतद्रूपापि तद्रूपरूपिणीवानुभूयते ॥

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

स च विवर्तो बुध्यविवेकादात्मनां भवतीत्याह ।

स परस्परसंबद्धश्चिदचिद्गोचरस्तयोः ।
अन्योन्याध्याससाध्यत्वादविवेककृतोदयः ॥

एतदेव व्याचष्टे ।

तत्र चित्स्वाभिसम्बन्धबुद्धितत्त्वाविवेकतः ।
आरोप्यात्मनि तद्वृत्तिविकारानविकारिणी ॥

जन्मादीननुजानेति नष्टेति विविधेति च ।
ससुखेति सदुःखेति स्वात्मानं दर्शयत्यणोः ॥

तद्वज्जडं च चैतन्यमारोप्यात्मनि चिद्गुणम् ।
अविवेकेन जानाति बालोऽहं कृश इत्यतः ॥

सर्वेषामविवेकोऽयमणूनां मलहेतुकः ।
भ्रान्तिप्रधानसन्तानकंदाश्चिज्जडवस्तुनोः ॥

य एषोऽनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मप्रतिपत्तिरूपः पुंसामविवेकस्स न निर्हेतुकः । मुक्तस्याऽपि प्रसङ्गादतस्तस्य केनाऽपि कारणेनानादिना भवितव्यं । अविवेकस्य अनादिसिद्धत्वाद्यस्तस्य हेतुस्स मल इति भावः ।

अत्रैव हेतुमाह ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

न हि संविद्विशेषाणां विशिष्टैर्जडवस्तुभिः ।
विवर्तभेदो युज्येरन्नन्तरा दृढबन्धनम् ॥

इदं चात्राकूतम् । मलावृतत्वादेवात्मनां कलादिद्वारेणैव ज्ञानाद्यभिव्यक्तिः । सा च मायाया मोहकत्वादनात्मादावत्माभिमानरूपेति ।

बन्धहेतुत्वमेव प्रपञ्चयति ।

तथा हि देहेऽहंबुद्धिर्न लोष्टे साऽपि कस्य चित्।
अणोरेव न सर्वेषामतो बन्धस्तयोर्मतः ॥

तयोश्चिज्जडयोरन्योन्यगुणाध्यासे बन्ध एव नियामक इति शेषः किं च ।

यानि यस्येन्द्रियाण्यासन्नरस्य ज्ञानकर्मणोः
न तानि पुनरन्यस्य करणानि नयोस्तथा ॥

विशिष्टैव विवर्ताय चिद्विशेषस्य वार्यते ।
बुद्धिर्न सर्वा सर्वेषां तेन बन्धस्तयोर्मतः ॥

बुध्यारूढं सुखं दुःखं किंचित्केनचिदेव यत् ।
पुंसोपभुज्यते तेन तयोर्बन्धो नियामकः ॥

अयमर्थः । आत्मानां हि संसारावस्थायां सर्वविषयस्य

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

ज्ञानादेस्स्वरूपत्वेन शास्त्रेषु श्रूयमाणस्यादर्शनात्तदावारकेण तावन्मलेनभाव्यम् । तेषां च किंचित्ज्ञत्वदर्शनात्कलादि-द्वारेण तज्जनकेन मोहहेतुत्वाद्विपरीतप्रतिपत्तिहेतुना माया-ख्येन बन्धेन भाव्यम् । भोगस्य सुखदुःखादेर्भोगसाधनानां च शरीरेन्द्रियाणां प्रत्यात्मनियतत्वेन विचित्रत्वाद्वैचित्र्यकारणं कर्माप्यवश्यमभ्युपेयमिति । अत्र सांख्यच्छायया विवेक एवात्र नियामकोऽस्तु । किं मलाख्येनाप्रसिद्धेन बन्धेन पुरुषस्य कल्पितेनेति चोदयति ।

अविवेको नियन्ता चेत् ।

परिहरति ।

स तयोरेव किङ्कृतः ।

तयोर्बुद्धिसंविदोरन्योन्याविवेकः केन कृतः । निर्हेतुकत्वे मुक्तस्यापि भवेत् । ततस्तत्कारणतयाऽऽनाद्यावारको मलो-ऽभ्युपगन्तव्यः । यदभावे मुक्तस्य न पुनरविवेको भवति तत एव च बन्धविमोचकस्येश्वरस्यापि सिद्धिरुक्तेत्याह ।

तेन बन्धोऽस्ति बन्धश्च पृथगेवेशितुर्मतः ॥

अतश्च ।

बन्धवर्ती विमूढात्मा मोक्षस्तद्बन्धमोचनम् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

गलिते सर्वथा बन्धे विमुक्ते चाणवे मले ॥
सर्वार्थद्योतिका शक्तिश्शिवस्यैव विजृम्भते ।

बन्धमोक्षश्च शिवप्रसादादेवेत्युक्तम् ।

सर्वावरणनिर्मुक्ता शक्तिरेषा महीयसी ॥२५३॥
अल्पीयांसं समावृत्य विषयं सा तु दर्शयेत् ।

कथं दर्शयतीत्यत्राह ।

परसंवित्स्वरूपायाः शक्तेरसति बन्धने ॥२५४॥
परमात्रं प्रकाशेत मुक्ताणूनामनारतम् ।

मलराहितत्वेन स्वपरप्रकाशिकाया मुक्तात्मसंविदः परमात्रं परस्य वस्तुनस्सत्तामात्रं प्रकाशते न तु बन्धात्मवदस्य विशेषेण भोग्यतया प्रकाशत इत्यर्थः । तथात्वे मुक्तस्याऽपि सुखदुःखादिसंवेदनेन भोक्तृत्वप्रसङ्गात् ।

अतो विमुक्तास्सर्वज्ञा न तु चिन्मात्रवेदिनः ॥

न तु स्वसंवेदनमात्रनिष्ठाः अपि तु शिववत्सर्वज्ञा एवेति ततश्च ।

सति बाह्ये तदज्ञानं वस्तुनि स्यात्तमः कृतम् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

बाह्ये च वस्तुनि सत्यपि यदेतद्विषयाज्ञानमात्रं बद्धात्मनां दृश्यते तन्मलकृतमेव ततश्च असर्वज्ञा न मुक्ता इत्याह—

तमसाच्छाद्यमाना हि न ते मुक्ता भवन्ति च ॥

शब्दानुवेधापेक्षित्वं च सविकल्पकज्ञानस्य बन्धहेतुकमित्याह—

विकल्पो बिन्दुसंक्षोभाच्छब्दवेधेन संविदाम् ।
जायते मलरुद्धानामणूनामर्थदर्शने ॥ २५७ ॥

निर्मलानामसंक्षोभाद्बिंदोस्तद्बन्धमोक्षजः ।
निर्विकल्पार्थसंवित्तिस्तदहर्जातबालवत् ॥

मुक्तानां तु पायेय बैन्दवपाशोत्तीर्णत्वाच्छब्दानुवेधसहकृतं बौद्धं सविकल्पकं ज्ञानं न भवेत् । किं तु चिच्छक्तिरेवान्यानपेक्षिणी ग्राह्यं वस्तु विषयीकरोति । **तदहर्जातबालवदिति** च शब्दादिविकल्परहितत्वमात्रे दृष्टान्तो ज्ञेयः । वस्तुतो बालस्यापि मलावृतत्वेन वस्तूनां यथास्वरूपानवबोधात् । मुक्तानां तु मलरहितत्वात्तच्छक्तिः समस्तं वस्तु यथावस्थितमेव गृह्णातीत्याह—

यो यदा वर्तते भावो भूतो भावि च तत्तदा ।
यथार्थस्थिति गृह्णाति स्वसंवेद्या चिदव्यया ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तदुक्तं मोक्षकारिकासु । शिवार्कशक्तिदीधित्या समर्थीकृतचिद्दृशा । शिवं शक्त्यादिभिस्सार्धं पश्यत्यात्मा गतावृतिः । नैषां च सर्वज्ञत्वसर्वकर्तृत्वसंभवेऽपि प्रवृत्तिरित्याह ।

न ते विश्वस्य कर्तारः कर्तास्य शिव एव यत् ।

कुत इत्यत्राह ।

न हि कर्तृबहुत्वस्य गमकं विद्यते क्वचित् ॥

न हि रथादीनामप्यनेककर्तृकाणामेकस्थपतीच्छानुवर्तनं विनोत्पत्तिर्दृष्टा । यदुक्तं । बहवो यत्र नेतारस्सर्वे पण्डितमानिनः । सर्वे महत्त्वमिच्छन्ति तद्व्यक्तमवसीदति । अनेन प्रवाहेश्वरपेक्षाऽपि निरस्तः । ऐश्वर्यस्य स्वरूपव्यक्तिलाभात्मकत्वेन विनाशयोगात् । ततस्तेन नित्ययुक्तेन शिवेनैव कार्यस्य निर्वर्त्यमानत्वाद्रागद्वेषादिरहितत्वाच्च न प्रवर्तन्ते । एतदेव दर्शयति ।

नित्यमुक्तोदिताचिन्त्यप्रभावा शक्तिसंज्ञिता ।
संविदाश्रयते शश्वच्छिवं परमकारणम् ॥

स तया जडमाक्रम्य सृजत्यवति हन्ति च ।
तिरोदधाति भगवाननुगृह्णाति चात्मनः ॥

अनेन शक्तिविचारोपसंहारेण तदाश्रयभूतस्य शिवस्य

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

विचारोपक्षेपोऽपि कृतो वेदितव्यः । तथा हि जगतः सन्निवेशादिमत्त्वेन कार्यत्वात्तत्कर्तृतयाऽऽत्मनां च मलावृतत्वात्तन्मोक्षकर्तृत्वेन च शिवः सिद्ध एव यदुक्तं विवादाध्यासितं विश्वं विश्ववित्कर्तृपूर्वकं कार्यत्वादावयोः सिद्धं कार्यं कुम्भादिकं यथा ।

इदानीं तस्य कृत्यभेदादुपचारेण भेदमाह ।

कृत्येषु तेषु कर्ताऽसौ त्रिविधः पञ्चसूच्यते ।

कथमित्यत्राह ।

शक्तिमानाहितोद्योगः प्रवृत्तश्चेति देशिकैः ।

एतदेव प्रपञ्चयति ।

तत्र शक्तो भवेदाद्यो निष्कलश्शिवसंज्ञितः ।
तस्मिन्मुकुलिते वास्ते क्रियाख्या शक्तिरैश्वरी ॥

शक्तेरेकत्वादौपाधिको ज्ञानक्रियाभेद इति दर्शयितुं ज्ञानस्यापि क्रियारूपत्वाऽव्यभिचाराच्छक्तिः क्रियाशब्देनोक्ता तस्याः शक्तेः सर्वव्यापारोपसंहारेण स्वरूपमात्रावस्थाने सति शिवः शक्तादिशब्दवाच्यो भवति । सैव तस्य परबिन्दुस्वरूपाधिष्ठातुः लयावस्थोच्यते । अथ भोगावस्थायां उद्युक्तादिशब्दवाच्योऽसावित्याह—

सैवोन्मिषन्ती संप्राप्तबिन्दुगर्भभरालसा ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

पत्युराविष्करोत्युच्चैः परमानन्दसन्ततिम् ॥

सा च शक्तिरुद्योगेन बिन्दोः कार्यस्य प्रसवाभिमुख्यं कुर्वाणा यदा पत्युः परमानन्दसन्ततिं ज्ञानक्रियासमृद्धिं कार्योत्पादनेनाऽऽविष्करोति । तदा तस्य शिवस्य भोगः पालनात्मको भवतीति भावः । न तु शिवस्य परमानन्दः सुखातिशयो भोगश्च सुखसंवेदनरूपो व्याख्येयः निर्मलत्वेन शिवस्य उपाधिभूतयो स्तयोरसम्भवात् । तदानीं चोद्युक्तया शक्त्या सहायमुद्युक्तादिशब्दवाच्यः प्रकाशत इत्याह ।

स तया रमते नित्यं समुद्युक्तस्सदाशिवः ।
पञ्चमन्त्रतनुश्श्रीमान्देवस्सकलनिष्कलः ॥

अतश्च कार्योपाधिभिन्नाः ईशानादिपञ्चमन्त्रात्मिकाश्शक्तय एव तनुकार्यङ्कुर्वाणाश्शिवस्य तनुरुच्यन्ते न तु पारमार्थिकेति भावः । तदुक्तं श्रीमन्मृगेन्द्रे । **तद्वपुः** पञ्चभिर्मन्त्रैः पञ्चकृत्योपयोगिभिः ईशतत्पुरुषाघोरवामाजैर्मस्तकादिकं ततो ध्यानार्थमेव तस्यागमेष्वाकारश्रवणमित्युक्तत् । श्रीमत्पौष्करे । साधकस्य तु लक्ष्यार्थं तस्य रूपमिदं स्मृतमिति । अत्र च शिवशक्त्योर्लयादिभेदस्य बिन्द्ववस्थाभेदकृतत्वात्तस्य च शान्त्यतीतकलारूपस्य लयावस्थात्वेन श्रुतेश्शान्त्यादिकलाचतुष्टयपरिणामरूपं भोगाधिष्ठानं तदधिष्ठानेन शिव-

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

स्यापि भोगः प्रोच्यत इत्युक्तं । श्रीमन्मतङ्गे । चतुर्मूर्तिमयं शुभ्रं यत्तत्सकळनिष्कळं । तस्मिन्भोगस्समुद्दिष्टः पत्युर्विश्वस्य सर्वदेति । यद्येवं सदाशिवभवनाधिष्ठान एव देवस्य सदाशिवत्वात्तस्यैव पञ्चमन्त्ररूपत्वात्कथमत्र भोगावस्थायां तत्कथनं निवृत्यादिभुवनेषु केवलं सद्योजातादिमन्त्राकारतया शिवस्य ध्येयत्वादेवमुक्तं पञ्चमन्त्रसमष्टिरूपा मूर्तिस्तस्याधिकारावस्थस्य प्रवृत्तस्य सदाशिवभुवन एवेति वक्ष्यति सबिन्दोरित्यादिना । एषोऽर्थश्च श्रीमन्मतङ्गे विस्तरेण दर्शितः । इति तत एवावधारितव्यम् ।

इदानीं शक्तेर्मन्त्रत्वमाह ।

मननात्सर्वभावानां त्राणात्संसारसागरात् ।
मन्त्ररूपा हि तच्छक्तिर्मननत्राणधर्मिणी ॥

तदुक्तं । मननं सर्ववेदित्वं त्राणं संसार्यनुग्रहः । मननत्राणधर्मित्वान्मन्त्र इत्यभिधीयते ॥ इति एषा च व्युत्पत्तिः शिवस्य शक्तेर्विद्येश्वरादीनां च समानैव अतश्च वाचकशब्दानामुपचारेण मन्त्रशब्दप्रयोगः । अस्याश्चौपाधिक एव भेद इत्याह—

कार्यभेदादधिष्ठानवशादेकैव पञ्चधा ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सा भातिबिन्दुशान्त्यादिपञ्चाधिष्ठेयगोचरा ॥

बिन्दुशान्त्यादिभुवनाधिष्ठानादस्य ईशानादिभेद इत्युक्तं प्रागेव । एतदेव प्रपञ्चयति—

बिन्दुश्शान्तिः कला विद्या प्रतिष्ठा सन्निवृत्तिका।
भोगस्थानानि पञ्चैषां बिन्दुसंज्ञा शिवेरिता ॥

ननु शान्त्यादिभुवनचतुष्टयमेव भोगस्थानमित्युक्तम् । सत्यम् । शान्त्यतीतरूपस्य परबिन्दोर्लयावस्थारूपत्वेऽपि सृष्ट्यारम्भ एव तद्भुवनोत्पत्तेस्तदप्यत्र भोगस्थानतयेत्युक्तमित्यविरोधः ।

अत एवासां बिन्दुकलानां कारणावस्थायां लयरूपत्वेन परबिन्दुसंज्ञेत्याह—

कलानामविभागोऽयं पञ्चानां बिन्दुसंज्ञितः ।
तद्गोचरा परा मूर्तिरपरा कार्यगोचरा ॥ २६९ ॥

परा मूर्तिर्बिन्द्वधिष्ठात्री लयावस्था शक्तिः कार्याधिष्ठात्री त्वपरा शिवस्य मूर्तिरित्यर्थः । एवं च,

या तस्य विमला शक्तिः शिवस्य समवायिनी ।
सैव मूर्तिः क्रियाभेदात्सादाख्या तनुरुच्यते ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

समवेतशक्तिरेव बिन्दुपरिणामस्य निवृत्तिभुवनाधोवर्तिनः सदाशिवभुवनस्याधिष्ठानादधिकारं कुर्वाणोपचारेण तस्य सदाशिवाख्या तनुरुच्यत इत्यर्थः। दीक्षादिना तत्तद्भुवन-प्राप्तानां सत्य एव भेदः। तदधिष्ठात्रयोस्तु शिवशक्त्योः कार्य-भेदाद्भेद इत्युक्तमित्याह—

महामायासमाक्रान्ता शिवेन बलशालिना ।
भोगस्थाननिविष्टानां निर्मलानां शिवात्मनाम् ॥

तनुभोगेन्द्रियस्थानविज्ञानादि करोति यत् ।
तत्कार्यं सा क्रियाशक्तिरसावपि तथोच्यते ॥

शिवशक्तिक्षोभिता महामाया यद्यत्कार्यमुत्पादयति तत्र तदधिष्ठात्र्योशिवशक्त्योः कार्यभेदेन स्थानभेदेनोपचारा-त्तत्तत्संज्ञा भवति। यथा शान्तिभुवनाधिष्ठानेन तदुत्पादे च शक्तिरपि शान्तिसंज्ञा शिवश्च शान्तसंज्ञः इत्येवमन्यत्रापि द्रष्टव्यं तदुक्तं श्रीमन्मृगेन्द्रे। किं तु नः पतिभेदोऽस्मिन्स शास्त्रे शक्तिभेदवत्। कृत्यभेदोपचारेण तद्भेदस्थानभेदत इति। एतदेव प्रपञ्चयति—

सर्वज्ञानक्रियारूपा शक्तिरेकाहि शूलिनः ।
इच्छाज्ञानक्रियाद्या यत्प्रभावाः कार्ययोनयः ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

यत्प्रभवा यदीया इच्छाज्ञानाद्या अवस्थाः कार्ययो नयः कार्योपाधिकृता इत्यर्थः इत्थं शक्तिरेव शिवस्य मूर्तिस्तत्कार्यविषया इत्युक्तं । इदानीं भोगाधिकारतत्ववासिनामुक्तवद्वैन्दवान्येव शरीरादीनीत्याह ।

ईश्वराणां शिवानां च महामायामयास्तथा ।
देहेन्द्रियादयश्शुद्धास्सुभगास्स्वाधिकारकाः ॥

तत्कारिणी तु ।

सेयं क्रियात्मिकाशक्तिश्शिवस्याव्यभिचारिणी
तत्संबन्धाच्छिवोशेषकार्याणां हेतुरुच्यते ॥

अधिकारावस्थोच्यते ।

स बिन्दोरवतीर्याणुसदाशिवसमावृतः ।
पतिकृत्याधिकारेषु सदाशिवमहेश्वरान् ॥
सम्प्रेषयन्नशेषाध्वमूर्धनि भ्राजते प्रभुः ।

अवतारणं चालोद्योगावस्थापरित्यागेन प्रवृत्तत्वं प्रवृत्तिश्च संस्कार्यसदाशिवान्विद्येश्वरांश्च यथाक्रमं स्वभुवनभोगेष्वशुद्धाध्वाधिकारे च नियोजनमत एव प्रभवनशीलोऽशेषाध्वाधिष्ठाता भ्राजते सदाशिवाकारेण ध्येयतां प्राप्नोतीत्यर्थः । तदेव ध्येयाकाराधिष्ठानं दर्शयति ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

पञ्चस्रोतोमुखश्शान्तःप्रभुश्शक्तिशिराश्शिवः।
दृक्क्रियेच्छाविशालाक्षो विज्ञानेन्दुकलान्वितः ॥
ईशानमूर्धा पुंवक्त्रो दशदिग्बाहुमण्डलः ॥
अघोरहृदयो वामगुह्यो जाततनूज्वलः ।
प्रवृत्तिमानयं देवस्सकलस्सर्वपावनः ॥२७९॥

अत्र च पञ्चस्रोतश्शब्देन मननत्राणरूपायाः शक्तेः पञ्चावस्था भेदा उच्यन्ते । इत्थं बिन्द्ववस्थाधिष्ठानभेदेऽपि शिवशक्त्योरेकत्वं प्रदर्श्योपसंहरति ।

एक एव शिवस्तद्वच्छक्तिरप्यविकारिणी ।
लयभोगाधिकारेषु तौ हि चिन्मात्ररूपिणौ ॥

इदानीमनेकत्वमेवौपचारिकमेतयोः प्रकारान्तरेण दर्शयितुं तत्तदवस्थाभाजामात्मनां वास्तवं भेदमाह—

तथा हि विमलोदारगभीरे चिन्महोदधौ ।
स्वात्मनि प्रविलीयन्ते तेनैके समधिष्ठिताः ॥

परिणतमलाः केचिदात्मानस्तेन शिवेनानुग्राहकेण समधिष्ठिताः । अनुग्रहशक्त्या मोचिताः सन्तो विमलतरनिरतिशयसर्वज्ञत्वसर्वकर्तृत्वसमुद्ररूपे स्वात्मनि स्वरूपे लीयन्ते

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तिष्ठन्ति तदनुग्रहात्तत्साम्यरूपं मोक्षं भजन्तीत्यर्थः । न तु शिवात्मन्यैक्यं ते प्रयान्तीति व्याख्येयम् । अद्वैतस्य प्रागेव निषेधात् एते च लयावस्थशिवसमत्वाल्लयावस्थाभाज उच्यन्ते । विज्ञानकेवलिनोऽप्यपरिणतमलमायोत्तीर्णत्वान्महामायाश्रितत्वाद्भोगहीनत्वाच्च लयावस्थाभाजो निर्व्यापारत्वादुच्यन्त इत्याह—

शिवेन निभृतात्मीयशक्त्योऽन्ये विशेरते ।

भोगावस्थाभाज आह—

समालिङ्ग्य महामायामपरे वृत्तिशालिनीम् ॥
तत्संपर्कसुखैकाग्रबुद्धयो भोगलम्पटाः ।

शान्त्यादिभुवनरूपेण परिणतां महामायामाश्रित्य वर्तन्ते इत्यर्थः ।

अधिकारभाजोऽप्याह ।

तथा परे परव्योमसमाश्रित्याध्वमूर्धनि ॥२८३॥
कुर्वन्ति पञ्चकृत्याणि पत्युराज्ञानुवर्तिनः ।

अनन्तादयश्शुद्धाध्वमूर्धनि परव्योममहामायाभुवनान्याश्रित्य शिवाज्ञया पञ्चकृत्यकारिणो भवन्तीत्युक्तम् ।

ततस्स तेषामेकोऽपि लयभोगाधिकारिणाम् ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अधिष्ठातृतया भेदमौपचारिकमृच्छति ।
तद्वदेव मताशक्तिस्तयोर्भेदोऽधुनोच्यते ॥२८५॥

तयोःशिवशक्त्योः परस्परभेदः कथ्यते । तमेव भेदमाह—

शुद्धेऽध्वनि शिवः कर्ता कारणं शक्तिराश्रिता ।
समाश्रयस्स विज्ञेयस्स्वनिष्ठघनचिन्मयः ॥२८६॥

धर्मधर्मितयैवानयोर्भेदः । तत्र च धर्मिस्वरूपं ज्ञानं स्वनिष्ठमेव विषयग्रहणसामर्थ्यरूपं तु धर्मतयोच्यते इत्याह —

सा तु संविदशेषार्थग्रहणे लम्पटोदया ।
परमैश्वर्यरूपा च महिमा व्याप्तिरूपिणी ॥

ततश्च ।

महेश्वरो महानेषः सर्वार्थव्यापकस्तयोः ।

सर्वविषयव्यापकसामर्थ्ययुक्तत्वाच्छिवस्सर्वार्थव्यापकः । उक्तार्थमेव प्रकटयति तयोरिति ।

परानपेक्षं रूपं यद्विज्ञानं शिवसंज्ञितम् ॥२८८॥
तस्य शक्तिं परापेक्षं रूपमाहुर्विपश्चितः ।

परापेक्षं विषयापेक्षमित्यर्थः । कुत एवं कल्प्यत इति चेदत आह—

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

आकारद्वयसंवित्तिरशेषस्यापि वस्तुनः ॥२८९॥
परापेक्षानपेक्षाभ्यामस्ति शक्तिश्शिवाश्रया ।

जडविषये दाहकस्याग्नेर्दाह्यस्य सन्निधौ दहनसामर्थ्यदर्शनात् । अन्यथा तदनभिव्यक्तेः । चिद्विषये च आत्मनि विषयग्रहणरूपस्य स्वनिष्ठस्य गृहीतृस्वरूपस्य स्वसंवेदनसिद्धत्वादेतत्सिद्धमित्यर्थः । अतश्चास्तिशक्तिरिति । यद्येवमात्मशक्तेरस्याश्शिवशक्तेः को विशेषोऽत्र आह—

नित्योदितानवच्छिन्नविभूतेरीश्वरस्य यत् ॥
ज्ञेयाधिष्ठेयकार्यादौ न तु हेत्वादिकं परम् ।
तेन शक्तिः परापेक्षं रूपमीशस्य युज्यते ॥

नित्यमुक्तत्वादीश्वरस्य ज्ञेयादिविषये शक्तिव्यतिरेकेण न बुध्यादिकरणापेक्षा । आलोकादिसहकार्यपेक्षा च । अतः शक्तिरेव तस्य परापेक्षरूपं नान्यत् । बद्धात्मनां तु शक्त्याख्यं विषयापेक्षं स्वरूपमात्रमेवासौ कार्यादिहेतुर्न भवेत् । तेषां कार्यादौ करणाद्यपेक्षादर्शनादित्याह—

न सर्वस्य परापेक्षं रूपमात्रमसौ भवेत् ।
कार्यपुत्रादिरूपाणामन्यथैवोपलम्भनात् ॥२९२॥

शिवस्येति पाठे केवलस्य शंभोर्ज्ञानं न स्वरूपमात्रनिष्ठ-

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

मेव । किं तु विषयापेक्षमेव कार्यादिहेतुः । न तु बद्धात्मनां दृष्टकार्याणां पुत्रादीनां पित्रादेर्विषयादिसापेक्षणैव ज्ञानादि-नोत्पत्तिदर्शनादित्यर्थः । अतो नश्वरस्यापि निर्विषयं ग्रहणा-त्मकं ज्ञानं संभवतीत्याह—

न तु निर्विषयं ज्ञानं तदेव विषयग्रहः ।

यद्येवं विषयसान्निधान एव ग्रहणरूपस्योत्पत्तिदर्शनात् धर्मस्वरूपस्यानित्यत्वप्रसङ्गः । तन्न ; शिवस्य सर्वदा बिन्द्वा-देर्नित्यस्य विषयस्य ग्राह्यत्वात् ग्रहणसामर्थ्यस्य गृहीतृसम-वेतत्वेन सर्वदावस्थानाच्च । नन्वात्मनां नीलादिज्ञानविनाशेन पीतादिज्ञानस्य क्रमेणोत्पत्तिदर्शनात् तत्सामर्थ्यस्याप्यनित्यत्वं लक्ष्यते अत आह—

विरोधेनाथ पर्यायान्नैवमप्याविनाशि यत् ॥

नश्वराणामयं धर्मो यः काले नान्यथोदयः ।

नीलाद्यध्यवसायरूपाद्भिन्नस्य पीताध्यवसायरूपस्य बौद्ध-स्य ज्ञानस्य विनाशित्वात्परस्परविरोधाच्च पर्यायेणोत्पत्तावपि तत्तत्सुखादिरूपबुद्धिग्रहणसामर्थ्यस्य सर्वदा गृहीतृसमवेत-त्वेन संवेदनादविनाशित्वमेव अतो बौद्धस्यैवायमन्यथा परिणामः । ततश्च ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अविनाशि च तन्नित्यमिष्टमस्माद्विभिद्यते ॥
शक्तिराश्रयतः शंभोः स च तस्यास्ततस्तथा ।

तदप्यात्मसामर्थ्यं शिवसामर्थ्यवान्नित्यमेष्टव्यं । एवं च शिवशक्त्योरात्मभेदाभावेऽपि धर्मिधर्मभेदः सत्य एवेत्याह—**अस्मादिति** । ततस्तस्मात्कारणात्तथा धर्मात्मिकैव शक्तिरित्यर्थः । अत्र पराशङ्का ।

कार्योपाधिवशाच्छक्तिसंज्ञा स्यादपि चिद्घने ॥
न तु शक्तिः परापेक्षा वस्तुतोऽस्तीति केचन ।

धर्मिरूपमेव परमार्थं न तु धर्मरूपमित्यर्थः । **अत्रोत्तरं**
करणेन विना कार्यं कुर्वन्कर्ता भवेदिति ॥
मतिरेषामयुक्तैव युक्तिप्रत्यक्षबाधिता ।

कुलालादीनां हि कर्तॄणां करणेन विना कर्तृत्वादर्शनात् । शिवस्याऽपि कर्तृत्वात्केनाऽपि करणेन भवितव्यम् । तच्छक्त्यात्मकमेव । यदुक्तं श्रीमन्मृगेन्द्रे—करणं च न शक्त्यन्यदिति । एवमात्मनामपि देहस्पन्दादौ शक्तिरेव करणमित्युक्तम । किं च ग्रहणरूपस्य परमार्थस्यानभ्युपगमे स्थितिकालेऽप्युपाधिभूतसदाशिवतत्वादिबिन्दुकार्यविषयीकरणाभावादस्य सदाशिवादिभेदकल्पनमयुक्तम् । उपाध्यग्रहणेऽप्येत-

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

द्भेदोपचाराभ्युपगमे सर्वदैवाधिकारावस्था भवेत् । न तु लयावस्था । विशेषाभावादित्याह—

किं चागृहीतमपि चेदुपाधिः कार्यमीशितुः ॥
सदोपहितभावेन निरुपाधिः कथं शिवः ।

बिन्द्वाद्यग्रहणे तत्क्षोभाद्यप्ययस्य न युक्तं । अज्ञातस्य करणासंभवदित्याह—

कथं वायं भवेत्कर्ता कारणज्ञानवर्जितः ॥२९४॥

किं चाऽऽत्मनामपि शिवसमानगुणत्वाद्धर्मिरूपत्वाद्धर्मरूपज्ञानानभ्युपगमे सुखादिसंवेदनरूपो भोगो न सम्भवतीत्याह—

पुरुषो वा कथं बुद्धिं पश्येच्छक्त्या तया विना ।

एवं च सति ।

इदमन्धतमः कृत्स्नमन्तरा शक्तिदीपिकाम् ॥
जायेतान्यच्च भगवानशक्तः किं करिष्यति ।

शक्त्यनभ्युपगमे भोगमोक्षार्थं सर्वप्रवृत्तिशून्यं जगद्भवेदित्यर्थः । ततश्च ।

अनन्यापि तथा शंभोर्विभिन्ना शक्तिरिष्यते ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

यथा मसूरात्वङ्कुष्ठान्नापि भिन्नोक्तहेतुभिः ।

यथा मसूराख्यो धान्यविशेषः अङ्कुष्ठाख्यस्तज्जातीयोऽपि केनाप्याकारेण भिद्यते । एवं शिवशक्त्योर्वस्त्वन्तरत्वाभावेऽपि धर्मिधर्मतया भेदः सिद्धः । अत्र च समानजातीयत्वेनैक्य-मभ्युपगम्य इत्थं दृष्टान्तत्वमुक्तम् । वस्तुतोऽङ्कुष्ठमसूरयो-र्भेदात् । इत्थं शिवशक्त्योर्धर्मिधर्मतया भेदेऽपि तादात्म्य-संबन्धान्नात्मान्तरवद्भेद इत्याह । **नापि भिन्नोक्तेति** । इत्थं शक्तिशक्तिमतोरात्मान्तरत्वाभावेऽपि धर्मिधर्मतया भेदं प्रतिपाद्योपसंहरति ।

अनन्याऽपि विभिन्नाऽतः शंभोः सा समवायिनी
स्वाभाविकी च तन्मूला प्रभा भानोरिवामला ।

ननु बिन्द्वाख्ययैव शक्त्या शिवः कार्यं करिष्यति । किमनया । अत आह—

न ह्येष भगवाञ्शक्त्या स्वात्मनोऽत्यन्तभिन्नया ।
कदा चित्कुरुते किञ्चिन्नाऽपि जानाति किंचन ।

बिन्दोरुपादानत्वेन बहिरङ्गत्वादचेतनत्वाच्च चिद्रूपया स्वसमवायिन्या शक्त्या विना शिवो न बिन्द्वादिवस्तु विष-यीकर्तुं तत्क्षोभादि चोत्पादयितुं शक्नोति कुम्भकारादेरपि

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

चिच्छक्तियुक्तत्वेनैव दर्शनात् । यद्येवं शक्त्या विनेश्वरस्याप्यकिञ्चित्करत्वात् सैव जगत्कारणत्वेनास्तु । यदाहुः ।
यया विना न सर्वज्ञः सोऽपि तस्यै नमोऽस्तु ते । इति तन्न ।
शक्तेर्धर्मत्वेनाश्रयं विनाऽवस्थानासंभवात् तदाश्रयः स एव शक्तिमान् सङ्कल्पमात्रेण विश्वकर्तेत्याह--

अनाहितविशेषोऽपि हेतुर्देवो महेश्वरः ॥३०३॥

इदानीं कर्तृशक्त्याः भेदोपचारे उपाधिभूतं पारमार्थिकं कार्यभेदमाह--

कार्यभेदोऽपि कार्यस्य स्यादवस्थाविशेषतः ।

एतदेव प्रपञ्चयति ।

बिन्दुः प्रलीनकार्योऽसौ शिवशक्तिसमीरितः॥

सर्गाय स्थितये सृष्टप्रपञ्चविलयाय च ।
चिरस्थापितविश्वो हि बिन्दुरेव प्रवर्तते ॥

अवस्थाभेदमासाद्य घटमारभते यथा ।
मृदवस्थान्तरापत्त्या पूर्वमेवमसावपि ॥ ३०६ ॥

प्रभुशक्तिसमाक्रान्तस्तत्तद्वृत्तिविशेषतः ।
कार्यभेदाय घटते निर्विकारेऽपि शूलिनि ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

किं च,

अनापन्नविकारोऽपि यथोक्तक्रमभाविनाम् ।
भेदसंशोषचूर्णानामवस्थाभेदजन्मनाम् ॥ ३०८॥

विधाता कमलस्योष्णगभस्तिः स्यात्तथा शिवः ।
कर्ता सर्गादिकार्याणामविकारोऽपि शक्तिमान् ॥

ननु किमर्थमसौ सृष्ट्यादिकार्यं करोतीति चेत्पश्वनुग्रहायेति ब्रूमः । यद्येवं सर्वानुग्राहकत्वेऽपि शिवः कथं केषांचिदेव मोक्षं करोति न सर्वेषां अयमेवास्य स्वभावो वा तर्ह्यन्तः रागद्वेषयुक्तः स्यात् । अत आह—

यथा मधूच्छिष्टमृदोरनपेक्षः क्षणेन च ।
द्रवताशुष्कताहेतुरविकारोऽपि भास्करः ॥ ३१०॥

तथा समासमात्मीयपुण्यापुण्याख्यकर्मणाम् ।
अणूनामविकारोऽपि बन्धमोक्षकरः शिवः ॥

सत्यं सर्वानुग्राहकः शिवः । न चास्य रागादिर्विद्यते । अनादिमलरहितत्वात् । बन्धमोक्षकर्तृत्वं चात्मनामेव । योग्यत्वादित्युक्तम् । ततश्च यथैकाकार एवार्कः स्वसन्निधानेन द्रवत्वयोग्यस्य मधूच्छिष्टस्य द्रवतां शोषत्वयोग्याया: मृदः शुष्कतां च करोति । तथा शिवोऽपि पक्वमलानां मोक्षयो-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

ग्यानां मोक्षं करोति । अपक्वमलानां बन्धयोग्यानां तत्पाकार्थं बन्धं करोतीत्यविरोधः । अतश्चात्र पुण्यापुण्याख्यशब्देन न हृष्यत्युपकारेण नापकारेण कुप्यति । यः समः सर्वभूतेषु जीवन्मुक्तः स उच्यते ॥ इति न्यायेनोपकारापकारात्मकं कर्मद्वयमुच्यते । तयोर्मलपरिपाकवशात्साम्यबुद्धौ सत्यां मोक्षो भवति । तदभावे तु बन्ध एव । न त्वश्वमेधब्रह्महत्यादिरूपौ पुण्यापुण्यौ तयोः साम्यं मोक्षहेतुरिति व्याख्येयम् । शास्त्रविरोधात्तादृशस्य कर्मसाम्यस्य संसारावस्थायामपि संभवात् स्वनाशमात्र एव चरितार्थत्वात् । समस्तकर्मसाम्यस्यापि विज्ञानकेवलित्वमात्र एव हेतुत्वात्, मोक्षहेतुत्वासम्भवात् मलपरिपाकस्यैव प्रोक्तकर्मसाम्याचिह्नानुमेयस्य दीक्षाद्वारेण मोक्षहेतुत्वसम्भवाच्चेत्यादि विस्तरेणास्माभिरुक्तं मृगेन्द्रवृत्तिदीपिकायाम् । साधितं च गुरुभिः श्रीमत्स्वायंभुवकिरणमतङ्गादिवृत्तिष्विति ततोऽवधेयम् । अतश्च ।

परस्परविरोधेन निवारितविपाकयोः ।
कर्मणोः सन्निपातेन शैवी शक्तिः पतत्यणौ ॥

विरुद्धफलयोरश्वमेधब्रह्महत्यादिधर्माधर्मरूपयोः स्वर्गब्रह्मलोकफलयोर्धर्मरूपयोरवीचीनरौरवफलयोर्वाऽधर्मरूपयोः कर्मणोः सन्निपाते सति शैवी शिवत्वदायिकाऽनुग्रा-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

हिका शक्तिरात्मनि न पतति । तस्या मलपरिपाक एव पातश्रवणात् । किं तु रोधशक्तिरेव नियतिद्वारेण विरुद्धकर्मक्षयार्थं पतति । तदुक्तं श्रीमन्मतङ्गे–धर्माधर्मविपाकेऽस्मिन्नित्यादिना दीक्षाया एव मलपरिपाकाविनाभूतायाः कर्मक्षयद्वारेण मोक्षहेतुत्वम् । यदुक्तं श्रीमत्किरणे—अनेकभविकं कर्मदग्धबीजमिवाणुभिः । भविष्यदपि संरुद्धं येनेदं तद्धि भोगतः ॥ इति । मलपरिपाके सत्यनुग्राहिकायाः पातः ।

तस्यां पतितमात्रायां निर्धूतघनसंवृतिः ।
प्रशान्तमलकालुष्यमात्मानमनुपश्यति ॥३१३॥

मलावरणापगमात्तद्विमुक्तं सर्वज्ञत्वादिरूपमस्य प्रकाशत इत्यर्थः ।

तदैव हि विमुक्तोऽसौ यदाघ्रातः शिवेच्छया ।

दीक्षाख्यया शिवशक्त्या स्पृष्टो मुक्त एवेति दीक्षोत्तरकालं चारब्धकार्यबन्धक्षयार्थं ।

नित्यनैमित्तिकेनैष कर्मणा वर्तते परम् ॥३१४॥

तत्रापि ।

अनेनैव शरीरेण परां व्याप्तिमखण्डिताम् ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

प्राप्नुवन्ति महाधीरा धन्या हि शिवयोगिनः ॥

योगाभ्यासादत्रैव सर्वज्ञत्वादिः प्रकाशत इत्यर्थः । प्रसङ्गाच्छिवयोगिमाहात्म्यमाह—

स पुनाति दृशा वाचा चरणेन करेण च ।
नदीजनपदोद्यानपुरादीनि स्वलीलया ॥ ३१६ ॥
किं पुनः शरणायातं भवभीतामिमं जनम् ।

इदानीं प्रकरणकर्ता स्वगुरुनमस्कारं करोति ।

नमस्तथाविधायास्मद्गुरवे शिवतेजसे ॥ ३१७॥
निधये योगरत्नानामनन्तफलदायिनाम् ।

केनेदं प्रकरणमारचितमित्यत्राह—

रामकण्ठकृतालोकनिर्मलीकृतचेतसा ॥ ३१८ ॥
रत्नत्रयपरीक्षेयं कृता श्रीकण्ठसूरिणा ।
श्रीरामकण्ठसद्वृत्तिं मयैवमनुकुर्वता ॥ ३१९ ॥
रत्नत्रयपरीक्षार्थः संक्षेपेण प्रकाशितः ।

॥ मूल समाप्तम् ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

येनाकारि कवीश्वरेण रसवानाश्चर्यसाराह्वयः
पाषण्डापजयश्च काव्यतिलको भक्तप्रकाशस्तथा ।
नाट्येष्वभ्युदयश्च सुन्दरगिरा शैवेषु सद्वृत्तय-
स्तेनाघोरशिवेन साधुरचिता रत्नत्रयोल्लेखिनी ॥

॥ इत्यघोरशिवाचार्यविरचिता रत्नत्रयोल्लेखिनी संपूर्णा ॥

शुभम् ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

॥ श्रीः ॥

॥ शिवाभ्यां नमः ॥

॥ भोगकारिका ॥

(वृत्तिसहिता ।)

शिवं प्रणम्य सद्भोगमोक्षदं मन्दचेतसाम् ।
हिताय लेशतः स्पष्टं व्याख्यास्ये भोगकारिकाम् ॥

इह हि तत्रभवद्भिः सद्योज्योतिपादैः प्रकरणप्रतिपाद्यमानं भोगमोक्षात्मकमर्थं सूचयद्भिस्तस्यैवाऽविघ्नपरिसमाप्त्यर्थं प्रथमं परमशिवनमस्कारः क्रियते ।

त्रिबन्धिचित्कलायोगभोगविश्लेषमोक्षदम् ।
सर्वकालक्रमार्थज्ञं प्रणम्याजं शिवं ध्रुवम् ॥

त्रयो बन्धाश्च मलकर्ममायालक्षणास्ते विद्यन्ते येषां ते त्रिबन्धिनः तेषां त्रिबन्धिनां सकलाख्यानां चिदात्मनां योऽयं कलायोगः सूक्ष्मदेहारम्भककलादिपृथ्व्यन्ततत्वात्म-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

कैस्तत्तद्भुवनजदेहरूपैश्चै मायीयैरवयवैस्संबन्धः तेन भोगं तद्विश्लेषेण मोक्षं च यो ददाति । तं तादृशम् । अनेन शिवस्यानादिमुक्तत्वेन सर्वाऽनुग्राहकत्वं सर्वकर्तृत्वं च सूच्यते । अत एव च **सर्वकालक्रमार्थज्ञं** सर्वं च भूतादि रूपं कालक्रमं सर्वांश्च तत्तत्कालभाविनः पदार्थान् जानातीति । एतेन चाऽस्य निर्मलत्वात्सर्वकर्तृत्वाच्च सार्वकालं सर्वज्ञता प्रतिपाद्यते । किं च, **अजं** अमलत्वादेव शरीरादिसंबन्धात्मनाऽपि जन्मना रहितं **ध्रुवं** चाविकारिणं न तु बिन्द्वादिवत्परिणामित्वम् । विकारित्वे जडत्वप्रसङ्गात् । **शिवं प्रणम्य** भोगमोक्षं वच्मीति वक्ष्यमाणेन संबन्धः ॥

रुरुसिद्धान्तसंसिद्धौ भोगमोक्षौ ससाधनौ ।
वच्मि साधकबोधाय लेशतो युक्तिसंस्कृतौ ॥

साधयन्ति भोगमोक्षाविति साधका आचार्यादयः । तेषां दीक्षादौ तत्साधनादिज्ञानाय युक्त्या अनुमानेन **संस्कृतौ** प्रतिपादितौ श्रीमद्रौरवतन्त्रोपलक्षितसिद्धान्तशास्त्रसिद्धौ **ससाधनौ भोगमोक्षौ** रौरवानुसारेणैव संक्षेपाद्वदामि । तत्र तावत्ससाधनं भोगं दर्शयितुं भोगाधिकारः केषामित्यत आह—

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अञ्जनादीशनुन्नानां जायते भोगलोलिका ।
कर्माशयानुरूपेण चित्रतां भवमण्डले ॥ ३ ॥

मलिनत्वादीशेनाधिकारावस्थेन शिवेनानन्तादिद्वारेण नुन्नानां भोगाऽभिमुखीकृतानां आत्मनाम् अञ्जनान्मलादेव हेतोः संसारमण्डले कर्मसंस्कारपाकानुगुणं भोगलोलिका भोगेच्छा जायते ।

ननु निर्मल एवाऽऽत्मा सांख्यैरभ्युपगतः । तदयुक्तम् । निर्मलस्य भोगासक्त्यसम्भवात् । तत्सम्भवे वा मुक्तस्यापि प्रसङ्गात् । ननु रागनिबन्धनाऽऽशक्तिरिष्यते । सत्यं । रागोपि मलिनस्यैवासक्तिहेतुः । यदुक्तं श्रीमत्स्वायंभुवे "यद्यशुद्धिर्न पुंसोऽस्ति सक्तिर्भोगेषु किं कृता" इति । अथ कोऽसौ भोगः कैः साधनैः साध्यते इत्यत आह—

ईश्वरेच्छासमाविष्टजगद्बीजपरिच्युतैः ।
साधनैः साध्यते भोगो बुद्धिवृत्त्यनुरञ्जनः ॥ ४ ॥

ईश्वरोऽत्रानन्त एव तस्यैव मायाक्षोभकत्वात् । यदुक्तं श्रीमत्किरणे—"शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोनन्तोऽसिते प्रभुः" इति । तदिच्छया क्षुब्धं यज्जगद्बीजं मायाख्यं तस्मात्प्रसूतैरसाधारणैस्सूक्ष्मदेहात्मकैस्साधारणभुवनादिरूपैस्साधारणाऽसाधारणभुवनजदेहात्माभिश्च यस्साधनैर्भोगो निष्पाद्यते

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

स च बुद्धिवृत्यनुरंजनात्मकः । बुद्धिवृत्या सुखदुःखमोहाध्यवसायरूपया आत्मचैतन्यस्य यदनुरंजनं स एव भोगः । अनुरागश्चात्र सुखाध्यवसायाकारबुद्धिवृत्तिनिष्ठतया तत्संवित्तिस्तदनुभव एव न तु प्रतिबिंबात्मता आत्मनः ।परिणामिताप्रसङ्गात् । तदुक्तं श्रीमत्स्वायंभुवे "भोगोस्य वेदना पुंसस्सुखदुःखादिलक्षणा" इति । तत्र भूतानां तावद्भोगमाधनतां प्रतिपादयति ॥

क्ष्माजलाग्निमरुत्व्योम्नां गुणवृत्यक्षभूमिताः ।
स्वमात्रापूरपुष्टानां गमयन्ति तदङ्गताम् ॥ ५ ॥

अत्र पृथिव्यादीनां भूतानां ये गुणादयस्त एव तेषां भोगाङ्गतां साधयन्ति । तत्र गुणा गन्धादयः । वृत्तयस्तु धारणादयः । अक्षभूमिता चेन्द्रियाधारत्वम् । एतान्यत्यनन्तरमेव दर्शयिष्यति । ततश्च । क्ष्मादयो गुणैर्वृत्तिभिरक्षाधारतया चात्मनां भोगसाधनतां भजन्तीत्यर्थः । कीदृशां क्ष्मादीनामित्यत आह—'**स्वमात्रापूरपुष्टानां**' इति । स्वैः स्वैः कारणभूतैस्तन्मात्रैर्य आपूरः पूरणं तेन पुष्टानां । अकृतस्य करणं कृतस्य परिवर्धनं च प्रकृतिकर्म यतः । एतानि च भूतानि स्वकारणैस्तन्मात्रैः सह स्थूलसूक्ष्मत्वेनेन्द्रियाधाराणि स्थितानीत्युक्तं श्रीमन्मतङ्गे । 'तन्मात्राणीह

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

घटवन्महाभूतानि लेपवत् ।' इति । तत्त्वसंग्रहेऽपि । एतत्कार्यं दशधाकरणैराविश्य कार्यते चेष्टाम् । अविभुत्वात्करणानि तु कार्यमधिष्ठाय चेष्टन्त इति । अतश्चैषां सूक्ष्मदेहस्थानां भूतानामिन्द्रियाधारत्वे बाह्यशरीरस्थानां च 'दिह उपचय' इति धात्वर्थगत्या देहत्वेन चोपचयधर्मित्वे साधारणे सति तेषां धृत्यादयोऽसाधारणवृत्तय इत्याह—

करणाधारदेहत्वे धृतिसङ्ग्रहपक्त्रय: ।
व्यूहोऽवकाशादानं च वृत्तयो वसुधादिषु ॥ ६॥

तत्र धृतिर्धारणं, भूमेर्वृत्तिः । सङ्ग्रहोऽवष्टम्भोऽम्भसः । पक्तिः पाकोऽग्नेः । व्यूहोऽवयवघटनं वायोः । अवकाशस्यास्पदस्य दानमाकाशस्य । अथ तदेवैषां साधारणमिन्द्रियाधारत्वं सूक्ष्मदेहस्थत्वेनाह —

अतिवाहिकदेहस्थं करणं प्रविजृम्भितैः ।
योनेर्योन्यन्तरं चापि याति पुंभोगसिद्धये ॥
पुमर्थदादृष्टवशात् इति ॥

अतिवाहयत्यात्मनां कर्म भोगेन नाशयतीत्यातिवाहिकः सूक्ष्मदेहः तत्स्थमेव करणमिन्द्रियवर्गश्चेष्टते । अविभुत्वेन निराश्रये चेष्टानुपपत्तेः सूक्ष्मदेहस्थभूततन्मात्राधार एव

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

करणवर्गोऽभिहित इत्युक्तम् । किं च तत्सूक्ष्मदेहस्थं करणं पुरुषार्थप्रदकर्मवशात् तस्यैव पुंसो भोगसिद्धये योनेर्योन्यन्तरं प्रयाति । यदुक्तं तत्वसङ्ग्रहे 'वसुधाद्यस्तत्वगणः प्रतिपुंनियतः कलान्तोऽयं पर्यटति कर्मवशतो भुवनजदेहेष्वयं च सर्वेषु इति । स च सूक्ष्मदेहः सूक्ष्मत्वात्पिशाचादिवन्नास्मदादिप्रत्यक्षः । अपि तु योगिप्रत्यक्षगम्य इत्याह—

देहो नैवाति बाह्यिकः ।
अक्षाधारोऽक्षगम्योऽयमनीशानां पिशाचवत् ॥

अथ भूतानां गुणानाह—

गन्धः क्षितौ रसः षोढा मधुरः क्ष्माकबन्धकः ।
शुक्लादि शुक्लं भास्वच्च रूपं क्षित्यादिषु त्रिषु ॥
अशीतोष्णौ महीवाय्वोः पाकजापाकजौ पृथक् ।
जले शीतः शिखिन्युष्णस्पर्शोऽयं सर्वत्रवस्थितः ॥
शब्दस्तद्द्रव्यजनितः पृथग्भूतचतुष्टये ।
प्रतिशब्दकसंघातो नभस्येवोदितो बुधैः ॥ ११ ॥

इति । तत्र गन्धः सुरभ्यसुरभिरूपः क्षितावेव । रसः क्ष्माजलयोः । तत्र क्षितौ कट्वाम्ललवणमधुरकषायतिक्तरूपः । जले तु मधुर एव । रूपं च क्ष्माजलाग्निषु । तत्र क्षितौ

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

शुक्लरक्तपीतकृष्णाद्यनेकविधम् । जले तु शुक्लमेव । अग्नौ भास्वद्रूपं । तेषु स वायुषु स्पर्शः स्थितः । स च मह्यां वायौ च प्रत्येकमशीतोऽनुष्णः । कः पुनर्महीवायुस्पर्शयोः परस्परं भेदोऽत आह—पाकजापाकजौ पृथगिति । मह्यां स्पर्शः पाकजः। वायौ त्वपाकज इत्ययमेवानयोर्भेदः । अस्य चोपलक्षणत्वा-द्रूपादयोऽपि महीगुणाः पाकजा एव । जले पुनः स्वाभा-विकः स्पर्शः शीत एव । अग्नावुष्ण एव । शब्दश्च भूम्या-दिषु चतुर्षु तैस्तैः पार्थिवादिभिर्द्रव्यैः परस्परमाहत्य जातः । नभसि तु प्रतिश्रुत्कृच्छब्दात्मकः । ननु वैशेषिकादिभिराश्रया-दन्यत्रोपलब्धेराकाशैकगुणः शब्द इष्यते । तदयुक्तम् । प्रत्यक्षागमबाधितत्वेन हेतोः कालात्ययापदिष्टत्वात् । यतः शब्दाश्रय एव भेर्यादौ शब्दः श्रूयते । किं च पृथिव्यां तावत्कटकटादिकः शब्दो दृश्यते । जलेच्छलच्छलादिः । अग्नौ धमधमादिः । शकशकादिर्वायौ । नभसि च प्रति-शब्दात्मक इति । एतच्चाकाशैकगुणत्वं शब्दस्य विस्तरेणा-स्माभिर्मृगेन्द्रवृत्तिदीपिकायां प्रतिक्षिप्तम् । उक्तं च श्रीम-न्मृगेन्द्रे 'इति पञ्चसु शब्दोऽयं स्पर्शो भूतचतुष्टये । अशीतोष्णो महीवाय्वोः शीतोष्णौ वारितेजसोः । भास्वदग्नौ जले शुक्लं क्षितौ शुक्लाद्यनेकधा । रूपं त्रिषु रसोऽम्भःसु

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

मधुरः षड्विधः क्षितौ । गन्धः क्षितावसुरभिः सुरभिश्च मतो बुधैः ।' इति । अथ उक्तार्थोपसंहारः ।

इत्थं यथोक्तगन्धादिव्रातोपेता धरादयः ।
अभिप्रसिद्धा लोकस्य

गन्धाद्याश्रयतया पृथिव्यादयोऽर्था लोकसिद्धा इत्यर्थः । एषां च भूतानामस्मदादिबाह्येन्द्रियपरिच्छेद्यगुणत्वाद्घटादिवत्कार्यत्वसिद्धेस्तत्कारणतया पञ्च तन्मात्राः सिद्धा इत्याह—

मात्रास्तैरनुमानतः ॥ १२ ॥

अथ गुणग्रहणादेव तदव्यतिरेकित्वाद्गुणिनोऽपि ग्रहणं सिद्ध्यतीति दर्शयितुं प्रोक्तानां तावद्भूतानां गुणेभ्योऽपृथक्भावं साधयितुमाह—

चित्रस्वभावकाः प्रोक्ता गुणभिन्ना धरादयः ।
क्रमव्यङ्ग्या यथा चित्रं पटे रूपं तु वेष्टिते ॥

उक्ताः पृथिव्यादयः । अर्थात् गन्धादिगुणैः परस्परं भिन्नाः स्थलोपलपर्वतसरित्समुद्राद्याकारभेदेन विचित्रस्वभावाश्च दृश्यन्ते । ततोऽमी वेष्टितपटगतचित्ररूपवत्क्रमव्यङ्ग्या एव । न हि पृथिव्यादीनां परिदृश्यमानावान्तराकारभेदभिन्नं सन्निकृष्टं स्वरूपं तदनुगुणं च विप्रकृष्टं स्वरूपं सर्वं

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

युगपद्ग्रहीतुं शक्यम् । अपि तु इन्द्रियैरनुमानेन च क्रमेण व्यज्यते । किमत इत्यत आह——

विशेषणविशेष्यत्वव्यपदेशस्य धीभिदाम् ।
क्रमव्यङ्ग्यत्वतो हेतोर्गोचरत्वं व्रजन्त्यमी ॥१४॥

अमी धरादयोऽर्थाः क्रमव्यङ्ग्यत्वाद्धेतोस्सुरभिरियं पृथिवीत्यादीनां विशेषणविशेष्यरूपाणां धीभिदां ज्ञानभेदानां तद्भावव्यपदेशस्य च विषयतां प्राप्नुवन्ति अत्र च ।

नागृहीतैस्तु गन्धाद्यैर्जातु चिज्जायते मतिः ।
धरित्र्यां हि जलादीनामग्रहेऽपि प्रजायते ॥१५॥

गन्धादिभ्यस्ततोऽनन्या जलादिभ्यः पृथक् च भूः।

हि यस्मात्कारणाद्विशेषणरूपैर्गन्धादिभिर्गुणैरगृहीतैर्विशेष्यायां धर्मिरूपायां धारित्र्यां कदाचिद्बुद्धिर्नोत्पद्यते । द्रव्यान्तरेषु तु जलादिष्वगृहीतेष्वप्युत्पद्यत एव । तस्माद्गन्धादिभ्यो भूमिरनन्या । जलादिभ्योऽन्यैवेति । एवं भूतान्तरेष्वपि ज्ञेयमित्याह-——

जलादिष्वेवमेवायं योज्यो हेतुर्मनीषिभिः ॥

ननु जपाकुसुमसन्निधाने रक्तभावं भजन् स्फटिकमणिः

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

शौक्ल्यगुणग्रहणादृतेऽपि गृह्यते । तस्माद्गुणिग्रहणस्य गुणग्रहणपूर्वकत्वमसिद्धमत आह—

संस्थानं चापि वर्णं च रूपं द्विविधमिष्यते ।
तस्मादसिद्धता नास्ति हेतोरुपाहिते मणौ ॥

इह हि द्रव्याणां वर्णवत्संस्थानात्मकमपि रूपं गुण एवेष्यते तस्माज्जपाकुसुमोपाहितस्यापि स्फटिकस्य ग्रहणं शौक्ल्यगुणग्रहणभावेऽपि वृत्तचतुरश्रादिसंस्थानग्रहणपुरस्सरमेव भवतीति द्रव्यग्रहणस्य गुणग्रहणपूर्वकत्वं सिद्धमेव । अतोऽस्य हेतोर्नासिद्धतेति । इत्थं भूतानां भोगाङ्गत्वं प्रसाध्य अधुना 'मात्रास्तैरनुमानत' इति प्रागुक्तां तन्मात्रासिद्धिं विशेषयितुं भूतानां तावत्कार्यत्वमतिर्देशेन दर्शयति—

गुणानां कार्यतासिद्धौ यो हेतुरभिधीयते ।
क्षित्यादिककलान्तानां योज्यः कारणसिद्धये ॥

गुणानामचैतन्ये सत्यनेकत्वाद्घटादिवत्कारणपूर्वकत्वमिति वक्ष्यति । ततस्तेनैव हेतुना पृथिव्यादीनामपि कार्यत्वसिद्धिः । तथा हि परिदृश्यमानभोगवैचित्र्यान्यथानुपपत्या पृथिव्यादिककलान्तत्रिंशत्तत्त्वात्मकः प्रत्यात्मनियतस्सूक्ष्मदेहोऽस्तीत्युक्तम् । आगमेषु च श्रूयते । ततस्तेषां पृथिव्यादीनां प्रतिपुरुषनियतत्वेनाचैतन्ये सत्यनेकत्वात्कारणपूर्वकत्वं सिद्ध्य-

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

तीति । तत्र तावद्भूतकारणत्वेन तन्मात्राऽसिद्धेः तत्तद्गुणभेदादेव पृथिव्यादीनां क्रमसिद्धिरित्याह ।

शब्दाद्येकोत्तराधिक्यामात्रास्तदविशेषतः ।
योनयो गगनादीनां क्रममिच्छन्ति धर्मिणाम् ॥

अयमत्र तात्पर्यार्थः । अनभिव्यक्तविशेषशब्दमात्रस्वरूपं शब्दतन्मात्रमाकाशस्योपादानम् । एवं तदधोवर्ति शब्दस्पर्शमात्रस्वरूपं स्पर्शतन्मात्रं वह्नेः । शब्दस्पर्शरूपरसात्मकं रसतन्मात्रं जलस्य । शब्दादिगन्धान्तपञ्चगुणरूपं गन्धतन्मात्रं भूमेः । इति ॥

अक्षरार्थस्तु गगनादिवच्छब्दाद्येकोत्तरं गुणाधिक्यं यासां ताः शब्दाद्येकोत्तराधिक्याः । तदविशेषतः गुणाविशेषात् अनभिव्यक्तविशेषशब्दादिमात्रस्वरूपात्तेषां गगनादीनां क्रमात् योनयः उपादानभूताः शब्दादितन्मात्राः । तेषामेव विशिष्टगुणयोगिनां धर्मिणामाकाशादीनां भूतानां सृष्टिक्रममिच्छन्ति । गुणाधिक्यक्रमेणाधोधोभावं भजन्त्यः कार्याणामप्यधोऽधोभावं कुर्वन्तीत्यर्थः । कथं पुनरासां भोगाङ्गत्वमत आह—

स्वकार्योत्पत्तितत्पुष्टिकर्तृता सर्वयोनिषु ।
मातात्वास्तु पुमर्थस्य साधनत्वं विनिश्चितम् ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अकृतस्य करणं कृतस्य परिवर्धनं च यतस्सर्वोपादानानां ततस्तन्मात्राणां मायादीनां च कार्ययोनीनां भोगसाधनतत्त्वोत्पादकत्वात्तदापूरकतया च भोगाङ्गत्वं सिद्धम् ।

अथ इन्द्रियाणामपि भोगाङ्गत्वं दर्शयितुं प्रथमं कर्मेन्द्रियसिद्धिमाह—

आनन्दगमनोत्सर्गवचनादानकर्मणाम् ।
उपस्थपादपायुवास्य पाणिनामानि वै पृथक् ॥

उत्सर्गो मलविरेकः । आनन्दादिक्रियाहेतुत्वेनोपस्थादीनि कर्मेन्द्रियाणि सिद्धानीत्यर्थः ।

किमेतान्युपस्थादीनि स्थानान्येवेन्द्रियाणि नेत्याह—

भावाभावौ तु यत्तन्त्रौ प्रत्येकं कर्मणां स्मृतौ ।
स्थानेषु सत्सु तानीह पञ्च कर्मेन्द्रियाणि तु ॥

इह हि केषांचित्पादादिस्थानयोगिनामपि तत्तदिन्द्रियशक्तिहीनानां गमनादिक्रिया न दृश्यते । तस्मात्तेषु स्थानेषु सत्स्वपि तासां क्रियाणां यदधीनौ भावाभावौ तास्तत्रस्थाः शक्तय एव पृथक् पञ्चेन्द्रियाणि ज्ञेयानि । अत एव कर्मेन्द्रियाणि येनेच्छन्ति नैयायिकादयस्ते प्रतिक्षिप्ताः ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

नन्वेवं चेद्भूलतोत्क्षेपादीनामपि क्रियात्वादनन्तता कर्मेन्द्रियाणां प्रसज्यते; अत आह—

आनन्दादिभिरेतैस्तु कर्मभिः परिभाषितैः ।
कर्मेन्द्रियाण्यतो नैषामानन्त्यं कर्मणां वशात् ॥

भवेदयं दोषो यद्यस्माभिः शरीरैकदेशवृत्तीनि तानीष्यन्ते । त्वगिन्द्रियवत्तेषां सर्वशरीरव्यापकत्वेनेष्टत्वाद्धस्तस्यैवायं भ्रूक्षेपणादिव्यापारः । पाय्वादेरिव जीर्णविरेचनाद्यात्मक इति भ्रूक्षेपादीनामप्यानन्दादिष्वेवान्तर्भावान्न तद्भेदादन्नेन्द्रियानन्त्यसिद्धिः । किञ्चैतैरेव आनन्दादिभिः प्रागुक्तैः प्रधानभूतैः कर्मभिः पञ्चैव कर्मेन्द्रियाणि सिध्यन्तीति नानन्तता कर्मेन्द्रियाणां तत्तत्संज्ञास्तु तेषां तत्र तत्र विशेषाधिष्ठानादित्यविरोधः । इदानीं बुद्धीन्द्रियसिद्धिमाह—

शब्दादिग्रहणे पुंसः कर्तुर्ना करणा कृतिः ।
न चैककरणा यस्मादपेक्षा न निवर्तते ॥ १४ ॥

शब्दादिग्रहणस्यापि क्रियात्वाच्छिदिक्रियावत्करणं विना नोत्पत्तिर्युक्ता । न च ताः पञ्चापि क्रियाः श्रोत्रादेरेकस्मादेव करणादुत्पद्यन्ते । यस्मात्करणान्तरापेक्षा न निवर्तते

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

शब्दग्रहणकरणभूते श्रोत्रे सत्यपि स्पर्शादिग्रहणे त्वगादि करणान्तरापेक्षिता दृश्यत इति भावः।

कानि तानि करणानीत्यत आह—

करणानि श्रुतिस्त्वक्च चक्षुर्जिह्वा च नासिका।

ततश्च शब्दादिग्रहणान्यथानुपपत्त्या तान्यनुमीयन्ते इत्यभिप्रायेणाह—

शब्दाद्यालोचनं तेषां वृत्तिः शब्दादिसन्निधौ॥

सन्निधेति पाठ शब्दादिबाह्याकारसदृशमान्तरमाकार-मध्यवसायिन्या बुद्ध्या सह मनोऽधिष्ठितानीन्द्रियाणि विद्या या विषयत्वेनोपस्थापयन्तीत्यर्थः। तं चेन्द्रियोपस्थापितं बुद्ध्याध्यवसितमाकारं अंतरङ्गेण विद्याख्येन करणेन पुरुषो गृह्णातीति वक्ष्यामः। उक्तं चान्यत्र। 'बुद्ध्याध्यवसितमर्थं पुरुषश्चेतयते' इति। न चैतानि कर्णशष्कुल्यादिस्थानान्ये-वेन्द्रियाणि। अपि तु तत्स्थाः शक्तय एव यतः स्थानवता-मपि कर्मवशात्तच्छक्तिवैकल्यान्न शब्दादिज्ञानमुत्पद्यत इत्याह—

एतानि स्थानमात्राणि बुध्यक्षाणीति मा कृथाः।
स्थानेषु सत्सु वैकल्यान्न संविज्ञायते यतः॥

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

अथान्त:करणसिद्धिरुच्यते ।

इच्छासंरंभबोधाख्या नोक्तैः सिध्यन्ति साधनैः।
तत्सिद्धौ करणान्यन्तर्मनोऽहंकारबुद्धयः ॥२७॥

इह हि पृथिव्यादीनां तत्वानां स्वकार्यैरेव सिद्धेः कार्यान्तरहेतुत्वे प्रमाणाभावात् अनेकतत्वपरिकल्पनाभावप्रसङ्गाच्च यानीच्छादिसिद्धौ साधनानि तानि मनोहङ्कारबुद्ध्याख्यान्यान्तराणि करणानीत्यन्त:करणसिद्धि: । तत्रेच्छाशब्देनैकाग्रतापरपर्यायोऽवधानात्मक: सङ्कल्पो विवक्षित: स मनसो वृत्ति: । संरंभश्च प्रयत्नोहङ्कारस्य बोधश्चाध्यवसायो बुद्धेरिति । एतच्च प्रपञ्चयिष्यते—

एषां च अन्त:करणबहि:करणानां परस्परोपकारेण पुरुषार्थसाधनत्वमाह—

अन्तर्मुखानि बाह्यानि संभूयेच्छादिसाधनम् ।
शिबिकोद्वाहिनरवदेकापायेन तास्ततः ॥ २८ ॥

अन्तर्मुखागतानां च चितेरर्थं प्रकुर्वताम् ।
बाह्यार्थं बुद्धिभिस्साधं न स्युरिच्छादिकाःक्रियाः

यतोऽन्तर्मुखानि बाह्यानि च करणानि शिबिकोद्वाहिनरवत्संभूयेच्छादीनां क्रियाणां साधनं भवन्ति । बाह्यार्था-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

लोचनपूर्वाणामेवाऽध्यवसायादीनां दर्शनात् अवधानादिना विना बाह्यार्थग्रहणाऽसंभवाच्च । ततश्चितेरात्मनोऽर्थे भोगाख्यं प्रयोजनं साधयतामन्तर्मुखागतानामन्तःकरणानां च शब्दाद्बहिःकरणानां वा अन्यतरस्यापि वर्गस्यापायेन तिष्ठतां सतां ता इच्छादिकाः क्रियाः शब्दादिबाह्यार्थबुद्धयो वा पुरुषार्थसाधनतया नोत्पद्यन्ते । यथा शिबिकोद्वाहिनोर्मध्यादेकस्यापाये तदुद्वहनक्रिया न दृश्यते । अत्र पराभिप्रायमाह--

अन्येन्तःकरणं प्राणमिच्छन्ति व्यक्तचेतनम् ।

अन्ये लोकायतैकदेशाः प्रणयनादिवृत्तिभिर्जीवनादिहेतुभूतं भूतपरिणामविशेषादभिव्यक्तचेतनं प्राणाख्यमान्तरं वायुमेवान्तःकारणमाहुः ।

अस्य दूषणमाह--

प्रयत्नैर्न विना सोऽस्ति तत्सिद्धौ करणं तु किम् ॥

प्राणात्मनस्तावद्वायोः कादाचित्कत्वेन प्रयत्नपूर्विका प्रवृत्तिर्दृश्यते । यदाहुः, 'प्रेरणाकर्षणे वायोः प्रयत्नेन विना कुतः ।' इति । ततः संरम्भात्मकप्रयत्नासिद्धौ केनापि करणेन भाव्यमित्यन्तःकरणसिद्धिः । वक्ष्यति च 'संरम्भोऽहंकृतेर्वृत्तिः ।' इति । किंच चैतन्योत्पत्तिरप्यस्य वायोर्भित्वताभ्युपगतेति तस्याः करणान्तरं वाच्यमित्याह--

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

चैतन्योद्गारभारोऽयमस्यान्तःकरणं वद ।
व्यक्तं न चास्य चैतन्यं वायुत्वाद्बाह्यवायुवत् ॥

न जडस्य चैतन्याभिव्यक्तिर्युक्ता सर्वस्य चैतन्याभिव्यक्तिप्रसङ्गादित्यस्य न चैतन्यं वायुत्वाद्बाह्यवायुवदिति ।

इत्थं प्राणान्तःकरणपक्षं निरस्य प्रागुक्तादन्तःकरणत्रयात्मनःसाधनायाह—

इच्छाहेत्वाशु सञ्चारि बहिर्देवप्रवर्तकम् ।
मनो यस्याशुभावाच्च कर्तुं न युगपन्मतिः ॥

देवनाद्द्योतनाद्देवशब्देनेन्द्रियाण्युच्यन्ते । मतिशब्देन च तत्तदर्थविषयं ज्ञानं ततश्चायमर्थः । इह हि आत्मनो इन्द्रियार्थसन्निकर्षे सत्यपि सर्वाणीन्द्रियाणि युगपन्न प्रवर्तन्ते । किञ्चिदेव, न च तत्सर्वदा प्रवर्तते ततस्तत्प्रवृत्तौ यत्करणं तदिच्छायाः सङ्कल्पात्मनोऽवधानस्य हेतुभूतं बाह्येन्द्रियप्रवर्तकं च मनो बोद्धव्यम् । अत एव च तदान्तरेण अन्तःकरणाधिष्ठानेन सुखादिसङ्कल्पेन च बाह्येन्द्रियाधिष्ठानेन च द्विधाऽधिकारीत्युक्तम् । श्रीमन्मतङ्गे—द्विधाऽधिकारि तच्चित्तं भोक्तुर्भोगोपपादकम् । बहिःकरणभावेन स्वोचितेन यतः सदा । इन्द्रियाणां तु सामर्थ्यं सङ्कल्पेनात्मवर्तिना । करो-

B. K. 2

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

त्यन्तःस्थितं भूयस्ततोऽन्तःकरणं मनः ॥ इति । श्रीमन्मृगेन्द्रेऽपि । 'देवप्रवर्तकं शीघ्रचारि सङ्कल्पधर्मि च' मनः । इति । ननु स्वादुसुरभ्यभिजातमर्मरशब्दवदभिरूपदीर्घतरषष्कुल्यास्वादने युगपत्पञ्चज्ञानोत्पत्तिर्दृश्यते । तन्न । यतस्तत्राप्युत्पलपत्रशतव्यक्तिभेदवदलक्ष्यसूक्ष्मक्रमाण्येव पञ्च ज्ञानान्युत्पद्यन्ते । अत एव एतदाशु संचारीत्युक्तम् । एवमहङ्कारमपि साधयति—

पञ्चकर्मकृतो वायोर्जीवनाय प्रवर्तकः । संरम्भोऽहङ्कृतेर्वृत्तिः

जीवनाय शरीरधारणार्थं प्रणयनापनयनादिपञ्चकर्मकृतस्तत्तद्वृत्तिभेदेन प्राणापानादिसंज्ञाभाजो वायोः प्रवर्तकः संरम्भात्मको यः प्रयत्नः सोऽहङ्कारवृत्तिरित्यहङ्कारसिद्धिः । यदुक्तं श्रीमन्मृगेन्द्रे—'अथ व्यक्तान्तराद्बुद्धेर्गर्वोऽभूत्करणं चितः । संरम्भाद्यस्य चेष्टन्ते शारीराः पञ्च वायव इति । तत्र प्रणयनं सूक्ष्मदेहस्योर्ध्वाधोनयनं प्राणस्य व्यापारः । अपनयनमधःप्रापणं मलादेरपानस्य । अन्नादेः रसरूपस्य सर्वगात्रेषु साम्येन नयनं समानस्य । विनमनमङ्गानां व्यानस्य । उन्नयनमान्तरस्य ध्वनेर्वर्णताप्रापणमुदानस्य ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

पञ्चकर्मकृत इति च प्राधान्यादुक्तम् । उद्गारादिकर्तृत्वेन चास्य वायोः श्रवणात् । यदुक्तं श्रीमत्कालोत्तरे–'उद्गारे नाग इत्युक्तः कूर्म उन्मीलने स्थितः । कृकरस्तु क्षुते चैव देवदत्तो विजृम्भणे । धनं जयस्थितोऽप्येष[1] मृतस्यापि न मुञ्चति ।' इति । किं च बुद्धिकार्यादयं घट इत्यादिग्राह्याध्यवसायरूपा-त्प्रत्यर्थं भिन्नरूपात्प्रत्ययादत्यन्तभेदेन भासमानः सर्वार्थग्रह-णेप्येकरूपोऽहमिति ग्राहकाध्यवसायरूपः प्रत्ययोऽहङ्कारस्यैव वृत्तिरित्याह—

अन्योऽर्थप्रत्ययो परः ॥ ३३ ॥

अहङ्कारवृत्त्यात्मकप्रत्ययोऽर्थप्रत्ययादन्य इत्यर्थः । ननु शब्दग्रहणादयः श्रोत्रादीनामसाधारणवृत्तयः संरंभस्तु तेषा-मेवेन्द्रियाणां साधारणवृत्तिरिति किमन्येनाहङ्कारेण कल्पितेन । अत आह—

न देवग्रामसामान्यवृत्तिः संरंभ इष्यते ।
यतोऽन्यतमवैकल्ये जायते सत्यहंकृतिः ॥ ३४॥

साधारणकार्यकर्तृणामेकापाये तत्क्रियानुत्पत्तेरुक्तत्वात्तद्वै-कल्येऽपि जायमानोऽयं संरंभोऽहंप्रत्ययो वाहङ्कारस्यैव कार्यं

---

[1]स्थितः पोषे इति पाठभेदः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

इत्यर्थः । अत्रैव प्रसङ्गात् बुद्धीन्द्रियकर्मेन्द्रियतन्मात्रवर्गाणां मनःसहितानामहङ्कारादेवोत्पत्तिरिति दर्शयितुमाह—

अन्ये चाहंकृतिस्कन्धास्त्रिवर्गजनकास्त्रयः ।
तैजसादिकनामानः क्रमशः सात्त्विकादयः ॥

सत्त्वरजस्तमोबहुलाः सात्त्विकराजसतामसास्त्रयोऽहङ्कारस्कन्धाः क्रमात्तैजसवैकारिकभूतादिकसंज्ञाभाजो भवन्ति । सात्त्विकादित्वं चैषां सत्त्वादिगुणबाहुल्यात् । ना मिश्रं परिणमत इति न्यायेन गुणान्तरसंसर्गोऽप्येषां विद्यते यतः । तत्र कुतः केषामुत्पत्तिरित्यत आह—

स मनोबुद्धिदेवानां गणो यस्मात्प्रकाशकः ।
तस्मात्ससात्त्विकाज्जातस्वानुरूपादहंकृतः ॥

अत्र नैयायिकमतमनूद्य दूषयति—

अन्ये तु बुद्धिदेवानां भौतिकत्वं प्रपेदिरे ।
विषयाणां तु नियमादसिद्धादेव हेतुतः ॥ ३७ ॥

एवं हि ते मन्यन्ते । शब्दैकग्राहकं श्रोत्रं, स्पर्शैकग्राहिका त्वगित्यादिनियतविषयत्वादिन्द्रियाणां तानि शब्दाद्याधाराकाशादिभूतजन्यानि । आहङ्कारिकत्वे तु तेषामेककारणत्वादेकरूपता स्यात् न तु प्रत्येकं विषयनियमसिद्धिरिति ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तदिदं तैरसिद्धादेव हेतोः कल्प्यते । तेषां विषयनियमस्य प्रकृतिनियमसाधकस्याऽसिद्धेः । नियतविषयत्वे हि इन्द्रियाणां तानि स्वस्वकारणान्येव भूतानि गुणसहितानि गृह्णीरन् । यावता द्रव्यान्तराणि तु तद्गुणाश्च चक्षुरादिना गृह्यन्ते ।

तथाहि ।

चतुर्द्रव्यगतान्स्पर्शांश्चतुरो मारुता त्वचा ।
*द्रव्याण्यनियतं चैव गृह्णाति मरुता समम् ॥

त्वगिन्द्रियं तावत् वायव्यत्वेनाऽभ्युपगतं वायुसहितानि पृथिव्यप्तेजांसि तद्गतांश्च स्पर्शान्गृह्णाति । किं च ।

त्रीणि द्रव्याणि चक्षुश्च तेषु रूपाणि चैव हि ।
अतो न नियमोऽक्षाणां विषयाणां च कल्प्यते ॥

दूषणान्तरमाह—

भौतिकत्वाच्च नियमे कर्मसामान्ययोः स्फुटम् ।
देवेभ्यो बुद्धयो न स्युः समवाये च देहिनाम् ॥

भौतिकत्वसाधनायाक्षाणां विषयनियमेऽभ्युपगम्यमाने भूतेभ्यो गुणेभ्यश्च व्यतिरेकेण भवद्भिरभ्युपगतानां कर्म-

*द्रव्याणि नियतामिति पाठभेदः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सामान्यसमवायानां पदार्थानां बुद्धयस्तेभ्यो जायमाना न भवेयुः। यदप्युक्तमाहङ्कारित्वे तुल्ये कथमक्षाणां कार्यभेद इति तदप्युत्पत्तिभेदादिक्षुविकाराणां गुडखण्डशर्करादीनामिव भविष्यतीति मत्वा श्रोत्रादीनां शब्दादिग्रहणनियामकापेक्षायामप्यस्माभिः पुरुषार्थदायकं कर्मैव नियामकमिष्यत इत्याह—

न चाप्यहं कृतो जन्म नियमे कारणं मम।
पुमर्थदातृ यत्कर्म कारणं तत् भवेरितम्॥

नास्माभिरहङ्कारजत्वमेव विषयनियमे कारणमिष्यते। किन्तु शिवाधिष्ठितं कर्म चेत्यर्थः। कायरन्ध्रविशिष्टे नभोभागे शब्दावद्योतकेऽभ्युपगम्यमाने नासारन्ध्रादीनामपि श्रवणेन्द्रियत्वप्रसक्ततया श्रवणाकाशस्यैव शब्दग्राहकत्वानियमे कर्मैवाऽदृष्टाख्यं नियामकं भौतिकेन्द्रियवादिनामपि इष्यत इत्याह--

नानाश्रुतिभयात्क्लृप्ते खे परेणापि कारणम्।
शब्दभोगस्य नियमे तत्प्रदं कर्म भाषितम्॥

खे कायाकाशे शब्दग्राहके कल्प्यमाने नानाश्रुतित्वप्रसङ्गभयाच्छ्रवणाकाशस्यैव शब्दग्रहणानियमे पुरुषार्थप्रदं कर्मैव कारणं भवतापीष्यत इत्यन्वयः।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

इत्थं बुद्धीन्द्रियाणां आहङ्कारिकत्वमाह—

राजसाद्वैकृताद्वर्गः कर्माक्षाणां तु कर्मकृत्।
जातः कार्यस्य येनेह कारणानुविधायिता॥

रजसः प्रवृत्तिहेतुत्वाद्राजसाद्वैकारिकाख्यादहङ्कारस्कन्धात्क्रियाहेतुः कर्मेन्द्रियवर्गो जातः यस्मात्कारणानुविधायित्वं कार्ये दृश्यते। अत एव सत्वस्य प्रकाशत्वात्प्रकाशस्य बुद्धीन्द्रियवर्गस्य सात्विकादुत्पत्तिरुक्ता। अन्यथा भिन्नस्वभावयोरनयोर्वर्गयोरेकस्मादेवोत्पत्त्यभ्युपगमे कारणानियमलक्षणोऽनवस्थादोषः प्रसज्यते इत्याह—

विनिवारयितुं शक्या नाव्यवस्था विकारजा।
सात्विकात्संभवे क्लृप्ते सात्वराजसवर्गयोः॥

अत एव।

मात्रासङ्घोऽप्यहङ्काराद्वर्गद्वयविलक्षणः।
प्रकाश्यस्तामसस्तस्माज्जातोऽभूतादिसंज्ञकात्॥

इदानीं बुद्धेरध्यवसायादिहेतुत्वमाह—

प्रकाशो विषयाकारो देवद्वारो न वा क्वचित्।
पुंबोधव्यक्तिभूमित्वाद्बोधो वृत्तिर्मतेर्मता॥

---

*अधिकारजेति पाठभेदः।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

इन्द्रियद्वारोऽयं घट इत्यादिबाह्यविषयाध्यवसायरूपप्रकाशस्तदनपेक्षश्चान्तरस्मृतिप्रतिभादिप्रकाशो वा शब्दाद्वक्ष्यमाणो भावप्रत्ययलक्षणश्च प्रकाशः पुरुषबोधस्य व्यक्तिस्थानत्वाद्बोधाख्यो मतेर्बुद्धेर्वृत्तिर्ज्ञेया । ततोऽध्यवसायस्मृत्यादिलिङ्गा बुद्धिः सिद्ध्यतीति । तदुक्तं श्रीमन्मृगेन्द्रे—'इति बुद्धिप्रकाशोऽयं भावप्रत्ययलक्षणः । बोध इत्युच्यते बोधव्यक्तिभूमितया पशोः ।' इति । एष च बुद्धिबोधस्त्रिविध इत्याह—

क्लृप्तिर्मतिः स्मृतिश्चेति

तत्र क्लृप्तिः कल्पनं प्रतिभेत्यर्थः । मतिश्च मननं ज्ञानमध्यवसाय इति यावत् । इत्थमिच्छादिकार्यभेदादन्तःकरणभेदः सिद्ध इत्युपसंहरति—

जाता भिन्नार्थवाचकाः ।
इच्छासंरम्भबोधाख्यास्तेनान्तःकरणं त्रिधा ॥

स्मृत्यादीनामवान्तरभेदेऽपि बोधकत्वेनैकार्थत्वात् बुद्धिवृत्तित्वम् इच्छादयस्तु वृत्तयो भिन्नार्थत्वाद्भिन्नकारणा इति भावः । ननु पृथिव्यादीनां विषयत्वेन भोग्यत्वादिन्द्रियाणां च तद्ग्रहणहेतुत्वादस्तु भोगसाधनता । बुद्धेस्तु इन्द्रियार्थ-

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सन्निकर्षादात्मन्युत्पद्यमानायाः संवेदनरूपत्वान्न भोगसाधनता । अपि तु आत्मगुणतैवेति नैयायिकादयः । अत आह--

तुल्ये गुणान्वितत्वे तु संवेद्यं किञ्चिदिष्यते ।
बुद्धिश्चापिह्यसंवेद्या धन्या तार्किकता तव ॥

अयमभिप्रायः द्विविधोऽत्र बोधोऽध्यवसायात्मकोऽनध्यवसायात्मकश्च । तत्र योऽध्यवसायात्मकः स सर्वदा ग्राहकरूपेणैव भासमानत्वादात्मनः स्वभाव एव । यस्तु अनध्यवसायरूपः स उत्पत्त्यपवर्गयोगित्वेन भासमानत्वान्न पुंसः स्वभावः । नित्यस्यानित्यस्वभावत्वायोगात् । तत्स्वभावत्वे चानित्यत्वप्रसङ्गात् । न च नित्योनुभूयते । ततो न पुंसः स्वभाव इति यस्य सः स्वभावः सा बुद्धिर्भावानामध्यवसेयतोत्पादिका धर्मज्ञानाद्यष्टगुणा बुद्धिरिति । ततश्च विषयाध्यवसायरूपत्वाद्भावप्रत्ययात्मना सत्त्वादिगुणत्रयान्वितेन स्वरूपेण भोग्यत्वाच्च बुद्धेरपि संवेद्यतैव । न त्वात्मगुणत्वम् । तदुक्तं तत्त्वसंग्रहे 'बुद्धिर्विषयाकारासुखादिरूपा समासतो भोग्यम्' इति । प्रयोगश्चात्र भवति बुद्धिरपि संवेद्यैव सत्त्वादिगुणान्वयात्पृथिव्यादिवदिति । करणत्वं च इन्द्रियवदस्या विषयाध्यवसायहेतुत्वात्सिद्धमित्युक्तम् । ननु धर्मादीनां

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

भावानामपि अस्माभिरात्मगुणत्वमिष्यते । तदयुक्तं । तेषामात्मसंस्कारकत्वायोगात् । तथाहि । ज्योतिष्टोमादिकर्मसंस्कारस्तावन्नात्मनि संभवति, अविकारित्वात् कर्मणां च कृष्यादीनामात्मसंस्कारत्वादृष्टेः अपि तु जड एव यत्र तानि संस्कारं कुर्वन्ति । सा बुद्धिः । एवं ज्ञानादिसंस्कारेऽपि वाच्यम् । तद्बलादेव स्वप्नस्मृतिप्रतिभादावसत्यप्यर्थे उल्लेखो दृश्यते । यतः अतश्च ।

अन्तर्बहिश्च करणं
साक्षात् भोगस्य साधनम् ।
भोग्यं विना न भोगोऽस्ती
त्यतो भोगस्य साधनम् ।। ४९ ।।

आन्तरो बाह्यश्च करणग्रामो भोगस्य सुखदुःखादिसंवेदनात्मनः साक्षात्करणम् । यदुक्तं श्रीमत्स्वायंभुवे ' भोगोऽस्य वेदना पुंसः सुखदुःखादिलक्षणा ' इति । स च भोगः स्रक्चन्दनादिभोग्यं विना न स्यादिति तद्ग्रहणपूर्वकस्य सुखाद्यध्यवसायस्यापि साधनमिष्यते । एतदेव दृष्टान्तेन प्रकटयति ।

सैनिकान्विजयायेह प्रयुङ्क्ते नृपतिर्यथा ।
प्रयुङ्क्ते महदादीनि बोधाद्यर्थमणुस्तथा ।। ५० ।।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सैनिकस्थे जये राज्ञः कर्तृत्वं तु यथा तथा ।
बुद्ध्यादिसंस्थे बोधादौ पुंसः कर्तृत्वमिष्यते ॥
स्वात्मार्थं सैनिकानां तु विजयो नेति ते यथा ।
साधनं विजयस्येष्टास्तथैव महदादयः ॥ ५२ ॥
तेषामपि हि बोधाद्यं स्वार्थं नेति विनिश्चितम् ।

करणानामचेतनत्वात्तद्वृत्तीनां न स्वार्थत्वम् । अपि तु चेतनपुरुषार्थतैवेति भावः ।

ततो बोधादिवृत्तीनां साधनं महदादयः ॥५३॥

अधुना भोग्यं विभजति—

मोहदुःखसुखाकारो रूपाख्यस्तद्भवो द्विधा ।
बौद्धो बोधःपरं भोग्यं मायादि च तदर्थतः ॥

उद्भूतगुणत्वेन मोहादिहेतुत्वान्मोहाद्याकारो रूपसंज्ञो धर्मादिभाववर्गः तदुपादानः सिद्ध्यादिप्रत्ययवर्गश्च द्विविधो यं बौद्धो बोधः पुंसः परमव्यवहितं भोग्यं मायादिकं भुवनादिवस्तु तदन्वयतस्तदर्थत्वाद्भोगाधिकरणत्वात्परंपरया भोग्यमिति । कोऽसौ रूपाख्य इत्यत आह—

अधर्मादित्रयं रागो धर्मादि च चतुष्टयम् ।
तमोरजः सत्त्वमयं रूपं तत्कर्मजं मतौ ॥ ५५ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अधर्माज्ञानानैश्वर्याख्यं रूपं तामसं रागस्त्ववैराग्याख्यं धर्मज्ञानवैराग्यैश्वर्याख्यं सात्विकमित्येवमष्टविधं रूपं बुद्धौ गुणत्वेन स्थितं कर्मतश्चोपादानाज्जातम् । तत्त्वभुवनशरीरादि तु कर्मणैव सहकारिणा मायाख्यादुपादानात् साक्षात्परंपरया चोत्पन्नमित्युक्तं श्रीमत्स्वायंभुवादौ ।

एते च ।

अत्यन्तोच्छेदतो मुक्तावभिव्यक्तेश्च सर्वतः ।
पटादिबोधावैतत्यादात्मनो न गुणागुणाः ॥

यतो धर्मादीनां मोक्षेत्यन्तोच्छेदः परैरपीष्यते यतश्चात्मस्वभावस्य ज्ञानक्रियात्मनो नित्यस्य व्यापकस्य मुक्तौ सर्वतो व्यापकत्वेनाभिव्यक्तिः श्रूयते यस्माच्च पटादिज्ञानानामध्यवसायरूपाणामवैतत्यं अव्यापकत्वं दृश्यते । तस्मादनित्या अव्यापकाश्चाधर्मादयो नित्यस्य व्यापकस्यात्मनो गुणा भवितुं नार्हन्ति । तत्समवाये तस्य परिणामित्वादिदोषप्रसङ्गात् । एते चाधर्मादयः सांसिद्धिकवैनयिकप्राकृतभेदा त्रिविधा आत्मन उत्पद्यन्ते । यदुक्तं श्रीमन्मृगेन्द्रे "सांसिद्धिका वैनयिकाः प्राकृताश्च भवन्त्यणोः । विशिष्टधर्मसंस्कारसमुद्दीपितचेतसा । गुणः सांसिद्धिको भाति देहापायेऽपि पूर्ववत् । लोकधीगुरुशास्त्रेभ्यो भाति वैनयिको गुणः ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

स मार्जितो वैनयिको मनोवाक्तनुचेष्टया । प्राकृतो देह-संयोगे व्यक्तः स्वप्नादिबोधवत् । इति । अतश्चैवं त्रिविधेभ्यो धर्मादिभ्यः फलभेदानाह—

एषामधोगतिर्बन्धो विघातः संसृतिः क्रमात् ।
स्वर्गो मुक्तिः प्रकृतिभावो विघातश्च फलानि च ॥

भवस्थानापराधोऽथ विघ्नो भोगानतिक्रमः ।
वश्योर्ध्वस्थितिसद्दृष्टिभृत्त्वं भोगास्पृहा फलम् ॥

स्वचिन्तितेषु वा विघ्नो रूपे सांसिद्धिके फलम् ।
विनयप्राकृते रूपे पूर्वोक्तफलसंग्रहः । ७९ ॥

वैनयिकेभ्यः प्राकृतेभ्यश्चाधर्मादिभ्यः क्रमादधोगत्यादीनि फलानि भवन्ति । सांसिद्धिकेभ्यस्तु भवादीनि । तत्राधोगतिर्नरकप्राप्तिः । बन्धोऽनात्मनि आत्माभिमानितादिः । संसृतिस्तिर्यगादियोनिप्राप्तिः । मुक्तिश्च दर्शनान्तरमोक्षः । परमुक्तेर्दीक्षाफलत्वेन मोक्षकारिकासु वक्ष्यमाणत्वात् । प्रकृतिभावः प्रकृतिलयः । भवः संसारः स्थानापराधः स्वस्थानान्न्यक्कारः । भोगानतिक्रमो भोगेच्छा । वश्योर्ध्वस्थितिः वश्यानां स्वपदाधःस्थानिनामधिष्ठानं सद्दृष्टिभृत्त्वं तत्तद्विषयसम्यक्ज्ञानयोगः । शेषं सुगमम् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

इत्थं भावान्विचार्य प्रत्ययान्व्याचष्टे—

व्यक्ताव्यक्तज्ञसंबुद्धिः सिद्धिः संप्रति सिद्ध्यति।
रागमात्रानुलिप्ताङ्गाद्धर्मादि समुदायतः ॥ ६० ॥

इह हि बुद्धौ वासनात्वेन स्थिता धर्मादयोऽष्टौ भावा उच्यन्ते । यदाहुः 'भावयन्ति यतो लिङ्गं तेन भावाः प्रकीर्तिता इति' त एव प्रकर्षावस्थां प्राप्ताः स्थूलेन रूपेण भोग्यदशामापन्नाः संसारिणां प्रत्यायनात्प्रत्ययाः कथ्यन्ते। तदुक्तं 'प्रत्याययन्ति क्षेत्रज्ञं प्रत्ययास्तेन कीर्तिताः ।' इति अतश्च वैराग्येण राजसेन ईषद्युक्तान् सात्विकाद्धर्मादिभाव-चतुष्टयात्सिद्धिरुत्पद्यते । सा च व्यक्तस्य गुणादेरव्यक्तस्य च प्रधानस्य ज्ञस्य च पुरुषस्य संबुद्धिस्तद्विषयं ज्ञानमेव प्रकर्षावस्थां प्राप्ता सिद्धिरुच्यते । उक्तं च 'पुंप्रकृत्यादि-विषया बुद्धिर्या सिद्धिरत्र सा ।' इति । तत्र व्यक्ताव्यक्त-विषये बुद्धिबोधे तत्प्रकाशकत्वेनात्यन्तं विविक्तः पुरुषः स्वय-मेवावभासते । यदाहुः 'तदा द्रष्टुः स्वरूपेऽवस्थानं' इति । न तु बुद्धिप्रकाश्यतया । भोग्यत्वादिदोषप्रसङ्गाद्यद्वक्ष्यति मोक्षकारिकासु 'परिणामी पुमान् भोग्यः प्राप्तस्तद्गोचरो यदि' इति ।

धर्मादिरूपसंपृक्ता पापादित्रितयोद्भवा ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तुष्टिः कृतार्थविज्ञानमनयात्मग्रहे सति ॥ ६१ ॥

सात्त्विकैर्धर्मादिभिरीषत्संपृक्ताद्धर्मादित्रयात्तामसात्तुष्टिरुत्पद्यते । सा च तुष्टिः प्रागुक्तया भूततन्मात्रादिज्ञानरूपया सिद्धया तत्तद्दर्शनोक्तेन स्वरूपेणात्मनो ग्रहणे सति । अधस्तनविषयाद्वैराग्यादकृतार्थस्यापि कृतार्थोऽस्मीत्युत्पद्यमाना बुद्धिस्तुष्टिरुच्यते । यच्छ्रूयते 'तुष्टिर्नु रकृतार्थस्य कृतार्थोऽस्मीति या मतिः' इति ।

अधर्मादित्रयाज्जाता रागलेशानुरञ्जितात् ।
अशक्तिर्देववैकल्यादसामर्थ्यं शुभादिषु ॥६२॥

शुभशब्देनात्रोत्रस्थेन्द्रियव्यापार आह्लाद उच्यते । तदादिषु इन्द्रियवैकल्यात्तदुपलक्षितशरीरवैकल्याद्वा क्लैब्ययाधिर्यादिरूपं यदसामर्थ्यं सेयमशक्तिस्तामसाद्वर्गाद्राजसेनेषत्संपृक्ताद्भवति । उक्तं च 'अशक्तिरप्रवृत्तत्वात्तामसी दुःखभावतः । राजस्यापि गुणो दृष्टः कार्ये कारणसंश्रयः' इति ।

तस्मादेवायथावस्तु विज्ञानं वीतरागतः ।
ईषद्धर्मादिसंपृक्तादभिव्यक्तो विपर्ययः ॥६३॥

तस्मात्तामसवर्गाद्राजसहीनात्सात्त्विकनषद्युक्तादयथार्थग्रहणरूपो विपर्ययस्तमो मोहमहामोहतामिस्रान्धतामिस्रलक्षणो

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

जायते। यच्छ्रूयते 'किंचित्सामान्यतोऽन्यत्र मतिरन्या विपर्ययः।' इति।

इत्थमतिसंक्षेपेणोक्तं भावप्रत्ययात्मकं बुद्धिबोधमुपसंहरति—

लेशोक्तो बुद्धिधर्मोऽयं,

एषां च भावप्रत्ययानां प्रपञ्चः श्रीमन्मतङ्गादौ विस्तरेण दर्शितः। प्रकाशितश्चास्माभिर्मृगेन्द्रवृत्तिदीपिकायामिति तत एवावधार्यः। ग्रन्थविस्तरभयात्तु नात्र लिख्यते।

अयं च,

चेतनो नोपभुञ्जते।

भोग्यत्वादिति शेषः। भोग्यत्वमेव साधयति—

भोग्यत्वं चास्य संसिद्धं येनोत्पन्नोऽनुभूयते॥
स चाप्यनुभवो भोगो भोक्तारं गमयत्यलम्।

अस्य बौद्धस्य ज्ञानस्योत्पत्त्यपवर्गयोगित्वेन भोग्यत्वमेव न तु भोक्तृत्वं तस्य सर्वदा ग्राहकरूपेण स्थिरस्यैव स्वसंवेदनसिद्धत्वादित्युक्तम्। अतश्च।

साधयित्रा विना यस्मात्सिद्धिर्नेह समीहिता॥

इह हि बुद्धिचैतन्यवादिभिर्बौद्धैर्भोक्तृत्वेनाभ्युपगतस्यास्य

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

बौद्धस्य ज्ञानस्यास्थिरत्वेन घटादिवदचेतनत्वात्कालान्तरभाविकर्मफलभोक्तृत्वासंभवादुक्तवद्भोग्यत्वाच्च स तत्तद्विषयसुखाद्यनुभवरूपो भोग एव भोक्तारं साधयति । यतो भोगक्रियासिद्धिर्भोक्तारं चेष्टमानमन्तरेण न संभवति भोगस्यापि क्रियात्वात्तत्कर्तृत्वेनाप्यात्मसिद्धिरिति भावः । समीहितेति । अभीष्टेत्यर्थः ।

अत्र चोदयति—

न विना दृष्टसंवादमनुमानस्य मानता ।

इह हि धूमेनानुमितोऽग्निरासीदत्र प्रत्यक्षीक्रियत इति तस्यानुमानस्य प्रमाणान्तरसंवादो दृश्यते । अत एव तस्य प्रामाण्यं । चक्रमूर्धादौ धूमादेरिव साध्यव्यभिचारादर्शनात्तत्रात्राप्यनुभवात्मनो ज्ञानस्यैव दर्शनात् ज्ञातृज्ञानयोराकारभेदानुपलम्भात् भोगाद्भोक्त्रनुमानस्यापि व्यभिचारशङ्कया प्रमाणत्वाभावाच्च भोक्तुर्ज्ञानव्यतिरिक्तस्यात्मनः सिद्धिरिति सौगताः । यदाहुः एकमेवेदं संविद्रूपं हर्षविषादाद्यनेकाकारविवर्तं पश्यामस्तत्र यथेष्टं संज्ञाः क्रियन्तामिति । तदयुक्तमित्याह—

दृष्टस्य केन संवादो येन तस्यास्ति मानता ।

अयमभिप्रायः । भोगस्य विषयसंवेदनात्मनोनुभवस्य

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

बाह्यविषयासन्निधानेऽपि सुषुप्त्यादावान्तरदेहस्पर्शमात्रविषयत्वेन स्थिरतयैव भासमानत्वात् स्थिरत्वेन स्वसंवेदनप्रत्यक्षसिद्धो ग्राहकरूपो आत्मेत्युक्तं न च ज्ञानस्य क्षणिकस्य स्वात्मनि क्रियाविरोधेन स्थैर्याध्यारोपो युक्तः। यदप्युक्तं अक्षणिकस्य क्रमयौगपद्याभ्यामर्थक्रियाविरोधात् यत्सत् तत्सर्वं क्षणिकमित्यपि न। अक्षणिकस्यैव मण्यादेः क्रमेण घटादीन्भावानवभासयतो युगपदेकगृहगतांस्तांस्तानर्थान् प्रकाशयतोऽनुभवसिद्धत्वात्। क्षणिकस्य चोत्पत्तिकाल एव नश्यतोऽनेकक्षणनिर्वर्त्यक्रियानुष्ठानाक्षमत्वादित्यादि विस्तरेण अस्मन्मतवृत्त्यादावाचार्यैः साधितमिति। ततश्चात्मनः स्वसंवेदनसिद्धत्वेऽप्यनुमेयत्वमभ्युपगम्योच्यते।

नेह प्रमाणसंवादः प्रत्यक्षस्य प्रमाणतः।

नात्र प्रमाणस्य प्रमाणान्तरसंवादापेक्षा। प्रत्यक्षस्य प्रमाणान्तरसंवादाभावेऽप्यनधिगतविषयज्ञानजनकत्वेन प्रामाण्यात् तदाहुः 'अनधिगतार्थगन्तृ प्रमाणं' इति।

कथं पुनश्चक्रमूर्धादौ व्यभिचारोऽत आह—

अन्वयव्यतिरेकाभ्यां व्यभिचारनिराकृतिः।

यस्य धूमादेर्येनाऽविनाभावलक्षणस्संबन्धोऽन्वयव्यतिरेकाभ्यां निश्चितः न तस्य तत्र व्यभिचारो दृश्यते। सु-

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

त्रिवेचितस्य धूमस्याऽप्राविव । चक्रमूर्धादिजन्यस्य तु स्वरूपाविवेकेन धूमत्वभ्रान्तिः । ततश्चात्राऽपि क्रियायास्सर्वत्र कर्तृपूर्वकत्वदर्शनात् भोगक्रियया भोक्ताऽनुमीयते । भवद्भिरपि स्वदेहे बुद्धिपूर्वकत्वेन सिद्धात्कार्यादिव्यवहारात्परशरीरे बुद्धिः प्रमाणान्तरसंवादं विनाऽप्यनुमानेनाऽनुमीयते इत्याह ।

देहधर्मस्य मानत्वे कारणं बुद्धिरिष्यते ॥ ६७ ॥

देहधर्मस्य चेष्टाद्यात्मनो मानत्वे हेतुत्वे सति तेन परशरीरे तद्धेतुबुद्धिः साध्यते इत्यर्थः । यदाहुः 'बुद्धिपूर्वा क्रियां दृष्ट्वा स्वदेहेऽन्यत्र तद्ग्रहात् । ज्ञायते धीः' इति । अतश्च रूपादिदर्शनान्यथानुपपत्त्या चक्षुरादीन्द्रियवद्भोगान्यथानुपपत्त्या भोक्तृसिद्धिरित्यभिप्रायेणाह—

अस्मात्सामान्यतो दृष्टादन्यस्यापि प्रमाणता ।
अनुमानस्य संसिद्धा

यदुक्तं चार्वाकैः । अस्तु भोक्ता । स तु परिदृश्यमानपृथिव्यादिचतुर्भूतविकारसमाहारात्मकः काय एव । तस्यैव परिणामविशेषेण किण्वादिद्रव्यविकारेण मदशक्त्यभिव्यक्तिवच्चैतन्याभिव्यक्तिः । प्राणादिवायुबलेन भोगादिक्रियादर्शनाच्च । न तु ततोऽन्यः । तस्य प्रत्यक्षेणादर्शनात् ।

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

यदाहुः 'दृष्टे संभवत्यदृष्टपरिकल्पना न न्याय्या' इति । तदपि निराकृतमित्याह—

कारणादत एव हि ॥ ६८ ॥

चेतनो बुद्धिबोधस्य भोक्ता मानसमर्थितः ।
पृथिव्यादिसमाहारो भवत्विति न युक्तिमत् ॥

अयमभिप्रायः । यतः शरीरस्याप्यन्तः शूलाद्यात्मना बहिश्च मृदुकर्कशादिना स्पर्शेन भोग्यत्वदर्शनाद्घटादिवच्चेतनत्वं न युक्तं । ततस्तस्यापि भोक्तृत्वेनाऽऽत्मा सिद्ध इति चेतनत्वं चास्य न प्रमाणोपपन्नमित्याह—

चैतन्यं हि त्वया तस्य केन मानेन निश्चितम् ।

ननु शुक्रशोणितात्मकदेहारम्भकभूतसद्भाव एव चैतन्यदर्शनात्तदभावे चाऽदर्शनाद्देहात्मकमेव चैतन्यमत आह—

सति भावेऽप्यनैकान्तः

शवशरीरे गर्भादौ वा देहात्मकभूतसद्भावेऽपि चैतन्याऽदर्शनान्न देहात्मकं चैतन्यं ततश्च शरीराऽऽत्मवादो न प्रमाणोपपन्न इत्याह ।

(तस्माद्भाग्यसवाशितम् ॥७०॥)

भोग्यत्वाच्चास्याऽचेतनत्वमित्याह—

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अनभिव्यक्तचैतन्या दृष्टा भोग्या गुडादयः ।
जीवच्छायोपभोग्यत्वादस्तु तुल्यो गुडादिभिः ॥

गुडादयो हि जीवस्याऽऽत्मनश्छाययाऽनुभवात्मना संविदा भोग्यत्वेन ग्राह्यतया विषयीक्रियमाणाः कदाचिदप्यभिव्यक्तचेतना न दृष्टाः । ततः कायाऽऽत्मापि भूतसमाहारः प्रोक्तवद्ग्राह्यत्वेन भोग्यतया विषयीकरणादचेतन एवेति न तस्य भोक्तृत्वमुपपद्यते । किं च देहस्यैव चेतनत्वे तस्याऽसकृत्परिणामेन विनाशाद्बाल्यावास्थाऽनुभूतं वृद्धावस्थायां स्मर्यमाणं नोपपद्यत इत्यादि विस्तरेण निराकृतोऽयं पक्षोऽस्माभिः श्रीमन्मृगेन्द्रवृत्तिदीपिकायाम् ।

ननु शरीरव्यतिरिक्तानामिन्द्रियाणामेव भोक्तृत्वमस्तु । नान्यस्येति इन्द्रियचैतनिकास्तदयुक्तमित्याह—

भोग्यत्वकरणत्वाभ्यामिन्द्रियाणां विनिश्चितम् ।
अचैतन्यमतो भोक्ता पुरुषश्चित्स्वभावकः ॥

उक्तवदिन्द्रियाणामपि भोगार्थतया भोग्यत्वात्करणत्वाच्छस्त्रादिवदचेतनत्वमनिवार्यमेवातो नैषां कर्तृत्वं अपि तु चित्स्वभावस्यात्मन एव तस्यैव हि सर्वान्यकारकप्रवृत्तिनिवृत्तिहेतुत्वेन कर्तृत्वं युक्तम् । यदाहुः 'प्रवृत्तौ च निवृत्तौ

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

च कारकाणां य ईश्वरः अप्रवृत्तः प्रवृत्तौ वा स कर्ता नाम कारक इति ।'

भोक्तुर्भोगश्चितेर्व्यक्तिर्भोग्यच्छायानुरञ्जिता।

भोग्या या बुद्धेः सुखादिरूपायाः छायया आकारेणानुरञ्जिता चैतन्यव्यक्तिरेव भोक्तुर्भोगः । यदुक्तं श्रीमत्स्वायम्भुवे 'भोगोऽस्य वेदना पुंसः सुखदुःखादिलक्षणा' इति तदानीं च

अचित्तच्चितिसंबन्धाद्भोग्यमाभाति चेतनम् ॥

अचेतनमपि बुद्ध्यात्मकं भोग्यं तस्यात्मनः चैतन्यसंश्लेषाच्चेतनवदाभासते । तदुक्तं सांख्यैरपि अचेतनं चेतनावदिव लिङ्गं इति । एवं च ।

भोग्यद्वारेण पाशानां पशूनां च परस्परम् ।
चेतनाचेतनच्छायानुषङ्गो भासते भृशम् ॥

भोग्यं हि वस्तु चित्ताधिष्ठितं बुद्धीन्द्रियबृन्दमात्मनो विषयत्वेनोपस्थापयति । तच्च बुध्याध्यवसितं पुरुषो गृह्णाति । यदाहुः 'बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयति' इति । ततश्च प्रकाशरूपत्वादादर्शस्थानीयेन भोगाख्येन बुद्धिबोधात्मना द्वारेणात्मनां भोक्तॄणां पाशानां च विषयरूपेण परिणतानां

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

भोग्यानां चेतनाचेतनारूपयोः छाययोः प्रतिबिम्बितयोराकारानुषङ्गः संश्लेषमात्रं भृशमत्यर्थमेकाकारतया भाव्यते । अत एवात्रानात्मादौ आत्मादिभ्रमः संसारिणाम् । तद्विवेकज्ञाने तु तेषां प्रकृतिलय इत्युक्तम् । स एव च सांख्यानां मोक्षः अतश्च

भोग्ये भोगः प्रभोश्छाया यथा चन्द्रमसो जले ।

प्रभोर्व्यापकस्यात्मनस्स एव भोग्यविषयो भोगः । या तदध्यवसायात्मनि बुद्धिबोधे चन्द्रमस इव जले छाया विशिष्टा चैतन्याभिव्यक्तिश्चन्द्रबिम्बस्य जडत्वात् स्थूलत्वाच्च विशिष्टस्वरूपाभिव्यक्तिमात्र एवात्र दृष्टान्तत्वम् अतो भोक्तृत्वाच्चेतनस्य पुरुषस्यैव कर्तृत्वं नाचेतनानां भोग्यानां बुद्ध्यादीनामिति मन्तव्यम् ॥

ननु क्रियावेशो हि कर्तृत्वम् । स यदि पुंसस्स्यात्परिणामिता भवेत् । पुरुषो हि निर्विकारस्ततो नास्य कर्तृत्वम् । किं तु प्रकृतेरेव सा हि विवेकज्ञानात्पूर्वं महदादिरूपेण भोग्यतया तस्यात्मानं दर्शयतीति संसार इत्युच्यते । तत्संभवे तु तस्मान्निवर्तमाना मुक्तिशब्दाभिधेयेति सांख्याः । यदुक्तं तैः । 'रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा रङ्गात् । पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः' इति ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अत आह—

परिणामभयात्पुंसि भोगे चानीप्सिते सति ॥
अविशेषो दुरापोहः प्रसक्तो भोक्तृमुक्तयोः ।

अयमभिप्रायः । नात्र क्रियावेशः कर्तृत्वं । अपि तु क्रियायां शक्तत्वमेव । तथाहि, अयस्कान्तसन्निधानादयस इवात्मनः सन्निधेः शरीरादेरेव स्पन्दादिरूपः क्रियावेशो दृश्यते । ततश्च बुध्यादिविषयीकरणरूपे भोगे पुंसो न परिणामप्रसङ्गः । किन्तु तत्परत्वेन तद्विषयीकरणमेव । भवत्पक्षे तु पुंसो निर्मलत्वेन तत्परत्वेऽप्यनभ्युपगम्यमाने भोक्तृमुक्तयोरविशेषो दुर्निवारः प्रसज्यते । उभयोरप्यनपेक्षत्वेन तुल्यत्वात् । ननु परार्थप्रवृत्ता प्रकृतिरेव तदर्थं प्रवर्तत इत्युक्तं । यदाहुः वत्सवृद्धिनिमित्तं क्षीरस्य । यथा प्रवृत्तिरज्ञस्य । पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्येति अत आह—

पुमर्थाय च पाशानां प्रवृत्तिर्विनिवारिता ॥

अयमभिप्रायः अचेतनत्वादेव प्रधानस्य पुरुषं प्रति प्रवृत्तिर्न युक्ता । क्षीरादेरपि चेतनगवाद्यधिष्ठितस्यैव प्रवृत्तिदृष्टेः । वायुजलादीनामपि पक्षीकृतत्वाच्च तत्प्रवृत्त्यभ्युपगमे-

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

ऽपि न निरपेक्षं प्रति प्रवृत्तिर्युक्ता । निरपेक्षं प्रति प्रवृत्तौ वा मुक्तस्याऽपि प्रवर्तते । ततश्च बद्धात्मनि साभिलाषत्वे भोगार्थं समुद्योगादात्मनि विकारे चाऽनभ्युपगम्यमाने तस्मिन् भोगोऽपि न युक्तिमानित्याह ।

भोक्तर्यविकृते भोगो मुक्तवन्नोपपद्यते ।

ननु अविवेक एव प्रधानप्रवृत्तेर्हेतुः । प्रकृतिपुरुषविवेकज्ञाने तु तं प्रत्युपरताधिकारत्वान्न प्रवर्तते । अतो न बद्धमुक्तयोराविशेषः । यदाहुः 'प्रकृतेः सुकुमारतरं न किं चिद्स्तीति मे मतिर्भवति या दृष्टास्मीति पुनर्दर्शनमुपैति पुरुषस्य' इति । तदयुक्तं । भवत्पक्षे पुंसो निर्मलत्वेनाविवेकायोगात् । निर्हेतुके चाविवेके सर्वदा विवेकाभावप्रसङ्गाच्च । तस्मादविवेकान्यथानुपपत्त्यापि तस्य समलत्वसरागताद्यभ्युपगन्तव्यमिति वक्ष्यामः ।

यद्येवमात्मनः समलत्वेनाज्ञस्वभावत्वे शरीरादियोगेन ज्ञातृतया विकारेचाभ्युपगम्यमाने स्वभावान्तरयोगादनित्यत्वप्रसङ्ग इति परमतमाशङ्कते ।

विकारित्वादनित्यश्चेत्

भोक्तेति शेषः । परिहरति ।

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

मायासाध्यं न मन्यते ॥७७॥

मायया स्वकार्यैस्सूक्ष्मबाह्यशरीरद्वारेण क्रियमाणं विशेषं न जानीते भवानिति शेषः । ततो नानित्यत्वादिदोष इत्यभिप्रायः । कथमित्यत आह—

स्वरूपव्यक्तिलाभाच न विकारो न नाशिता।

नास्माभिर्नैयायिकादिवज्जडरूप एवाऽऽत्मा इष्यते । अपि तु ज्ञस्वभाव एव । स तु तस्य स्वभावः शरीरादियोगं विनाऽनभिव्यक्तेरनादिना केनाऽपि प्रतिबद्धोऽवसीयते । स च मल एवेति वक्ष्यामः । ततश्च मायया कलादिभिः स्वकार्यैर्मलव्युदासे नैकदेशस्वरूपव्यक्तिरेवात्मनः क्रियते । मलपरिपाके तु दीक्षाख्यया शिवशक्त्या सर्वविषयोभिव्यज्यते । ततो नास्य विकारो विनाशिता चेति । अस्य च ।

भोग्योपधानरागश्च स्वच्छत्वान्नोक्तकारणात् ।

अतो भोग्यविषयोपधानजनितो रागोऽपि सुखदुःखमोहाकारः प्रकाशोऽस्य स्फटिकस्येव स्वच्छत्वात्प्रकाशरूपत्वात् । न तु पूर्वोक्तात्परिणामाख्यात्कारणात् । स च विषयोपरागोऽप्यस्य तत्परतया तद्विषयीकरणमेवेत्युक्तम् । ततो भोग्यस्य शरीरस्यासकृत्परिणामेऽपि भोक्तुर्न परिणाम इत्याह ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

शरीरपरिणामेन परिणामी न पुद्गलः ॥ ७८ ॥
स यतोऽचेतनो भोग्यो बुद्धिमत्परिणामतः।

तस्यापि परिणामाभ्युपगमे बुद्ध्यादिवद्भोग्यत्वमचेतनत्वं च स्यादित्यर्थः। तत्र परमतमुपन्यस्य दूषयति—

चैतन्यं हि गुणो ज्ञानं समवायोऽथ तेन वा ॥
स्वरूपं पुरुषस्येति नान्यदस्य न युक्तिमत्।

एवं हि नैयायिकादयो मन्यन्ते। जडस्वभाव एवाऽऽत्मा तस्य मनःसंयोगाद्गुणतया ज्ञानं समवेतमुत्पद्यते। तदेव च तस्य चैतन्यं नान्यज्ज्ञस्वभावत्वमिति। तदयुक्तम्। जडत्वे तस्य घटादिवत्ज्ञानसमवाययोगादिति।

नन्वत्र नियामकं कर्मादृष्टाख्यमस्ति। यत्कर्मसमानाधिकरणे पुरुष एव ज्ञानं समवेतमुत्पद्यते। नान्यत्र तद्व्यधिकरणे घटादाविति। अत आह—

अज्ञ नयैव विज्ञानं नान्यत्रेति नियामकम् ॥
कर्माऽपि नोपपन्नं तु तदन्यत्र स्थितं यतः।

कर्मणः कृष्यादेरिव प्रकृतिसंस्कारत्वमेव नात्मसंस्कारत्वं विकारित्वप्रसङ्गादित्युक्तम्। ततस्तदपि नात्र नियामकं

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

भवितुमर्हति । ततश्चैतन्यसमवायाच्चित्स्वभाव एवात्मा सिद्ध इत्याह—

मोहो मोहस्वभावेभ्यो यद्वन्नार्थान्तरं बुधाः ॥
चैतन्येभ्यः पदार्थेभ्यस्तद्वन्नार्थान्तरं चितिः ।

चैतन्यात्मनो ज्ञानस्यात्मधर्मत्वाद्धर्मनाशे धर्मिणोऽपि तदव्यतिरेकान्नाशः प्रसज्यत इति सर्वदा चेतनस्वभाव एवात्माभ्युपगन्तव्यः । तस्य च मलावृतत्वान्मनोबुद्ध्यादयस्तदभिव्यञ्जकतया सिद्धा इत्युक्तम् । अस्य च भोगक्रियायामुपकारकतया सहकारिभूतं प्रयोक्तृकरणरञ्जकरूपं कलाविद्यारागाख्यं कञ्जुकत्रयं प्रकृतिसाधनात्पश्चादभिधास्यते इत्याह—

प्रयोक्तृकरणं भोग्ये रञ्जकं चोपरि त्रयम् ॥
अस्य भोगक्रियाकर्तुः प्रकृतेरुपदेक्ष्यते ।

इत्थं प्रसङ्गाद्भोक्तारं प्रसाध्य प्रकृते बुद्धेरेवाहङ्कारस्योत्पत्तिरित्याह—

बुद्धेः स्कन्धोऽपरो भिन्नो योऽहङ्कारमजीजनत् ।
जनितारो गुणा येन दृष्टास्तत्प्रतिभादिषु ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

येन कारणेन तस्या बुद्धेः प्रतिभादिषु वृत्तिषु प्रोक्तेन नयेन परस्पराभिभवेनाश्रयान्मिथुनीभावाच्च कार्यस्योत्पादयितारो गुणाः दृष्टाः। यदुक्तं सांख्यैः 'अन्योन्याभिभवाश्रयान्मिथुनप्रवृत्तयश्च गुणा' इति तेन बुद्धेरेवाध्यवसायहेतोः स्कन्धादन्यो भागो गुणसंपृक्तोऽहङ्कारमजीजनत्। ततश्च न ह्येकं जनकमिति न्यायेनान्योन्यसंपृक्ता एव गुणा जनकास्तथैव च सर्वेषु पदार्थेषु वर्तन्ते। सात्त्विकादिव्यवहारस्तु तेषां सत्त्वादिबाहुल्यादिति भावः। साक्षाद्गुणकार्यत्वादेव चास्यां गुणान्वयो घटादिषु मृदाकारान्वयवदित्याह।

प्रथमा विकृतिः सातो गुणानां तत्र युज्यते।
उद्भवाभिभवाभ्यां तु नियमेन व्यवस्थितिः॥

गुणा हि तस्यां नियमेन परस्पराभिभवे न भवन्तः सिद्ध्यादिजनका इत्युक्तम्। यद्येवमहङ्कारस्यापि गुणान्वयाद्गुणेभ्य एवोत्पत्तिरस्तु अत आह—

अहङ्कारेऽप्ययं न्याय इति मा जल्प पण्डित।
अन्योन्यविकृतित्वात्तन्मात्रास्वप्यनुषज्यते॥

अहङ्कारादिभूतान्तानां सर्वेषामप्यन्योन्यविकृतित्वात्प्रोक्तवत्परंपरया गुणविकारत्वान्न केवलमहङ्कार एव तन्मात्रास्वपि अपि शब्दादिन्द्रियवर्गे भूतवर्गे च गुणान्वयोऽनुष-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

ज्यत एव । घटकपालादिषु मृदाकारान्वयवत् न तु सर्वेषां साक्षाद्गुणेभ्य एवोत्पत्तिरित्यदोषः ।

अथ के ते गुणाः कैर्व्यापारैश्च तेषां सिद्धिरित्यत आह—

सत्त्वं रजस्तमश्चेति कारणानि धियो गुणाः ।
प्रख्याव्यापारनियमैः पुंयोगं ये वितेनिरे ॥८६॥

प्रोक्तवद्बुद्ध्यादिद्वारेण भावप्रत्ययादिरूपं पुरुषभोग्यं वस्तु ये सर्गादौ चक्रुरुत्पादितवन्तः अधुनापि कुर्वते ते बुद्धेरपि कारणं गुणा इति । एते च परस्परावियोगादेकमेव तत्वम् । यच्छ्रूयते । त्रयो गुणास्तथाप्येकं तत्वं तदवियोगतः । इति । ततो बुद्धिकारणतया प्रकाशनिवृत्तिनियमाख्यैर्व्यापारैः सत्वादीनां सिद्धिः । एते च प्राधान्यात्प्रदर्शिताः । अन्येषामपि स्थैर्यधैर्यादीनां शौर्यक्रौर्यादीनामरतिमान्द्यादीनां गुणकार्याणामागमेषु श्रवणात् ।

ननु गुणा एव प्रधानाख्ययानित्यत्वेन स्थिता इति सांख्यास्तदयुक्तमित्याह—

अचैतन्येऽप्यनेकत्वसंख्यासंबन्धहेतुतः ।
तेषां कारणपूर्वत्वमिष्टं बुद्धिघटादिवत् ॥ ८७ ॥

यत एषामनेकत्वसंख्यासंबन्धादनेकत्वं ततोऽनेकत्वाद

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

चेतनत्वाच्च घटादिवत्कार्यत्वसिद्धिः । किं तेषामुपादानमित्यत आह—

**उपादानं गुणानां यत्प्रकृतिः साभिधीयते ।
अविभागस्थिता यस्यां निर्गच्छन्ति शिवेरिताः ॥**

यस्यां सूक्ष्मत्वेनाविभागेन स्थिता गुणाः शिवप्रेरणेन स्वस्वप्रवृत्तिविभागैः स्थूलाः अभिव्यज्यन्ते सा प्रकृतिः शिवेरिता इति च अचेतनत्वान्नास्या स्वातन्त्र्येण प्रवृत्तिरिति दर्शयति । अस्याश्च प्रतिपुरुषं सूक्ष्मदेहवर्तित्वेनानेकत्वात्कार्यत्वमिति वक्ष्यामः । अथ पुरुषस्य कलादिपञ्चकञ्चुकयुक्तस्य भोक्तृत्वेन पुंस्त्वमलयोगाद्दीक्षायां तच्छुद्ध्यर्थं प्रकृतितत्वादूर्ध्वमागमेषु पाठे सत्यपि तस्य व्यापकत्वाच्चेतनत्वेन भोक्तृत्वाच्चाध्वरूपत्वं भोगसाधनत्वं च न संभवतीति तमुपेक्ष्य तस्यैव रञ्जकत्वेन प्रागुक्तं रागतत्वं साधयितुमाह––

**भोग्यानुभवमासाद्य भोग्ये सक्तिः प्रवर्तते ।
तत्सिद्ध्यर्थं ततस्तस्य रागो भोगानुरञ्जकः ॥**

इह हि संसारावस्थायां पुरुषस्य भोग्यं दृष्ट्वा तस्मिन्सक्तिः प्रवर्तते । सा च नाहेतुरुत्पद्यते । मुक्त्यवस्थायामपि प्रसङ्गात् । अतस्तस्य पुंसस्तस्याः सक्तेः सिद्ध्यर्थं भोगाभि-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

लाषजनको रागोऽभ्युपगन्तव्यः ।

अत्र पराभिप्रायः ।

सत्वं रजस्तमो युक्तं विषयेष्वनुरञ्जकम् ।
बुद्धावभ्युदितं पुंसस्तस्मादन्यो निरर्थकः ॥९०॥

परिहरति—

तन्मतावुदितं भोग्यं तस्मिन्योऽस्यानुरञ्जकः ।
स रागोऽन्यः प्रमन्तव्यो रूपेऽप्येतद्धि दूषणम् ॥

सात्विकादिभोगसाधनविषयाकाराध्यवसायद्वारेण बुद्धाबुदितस्य सुखदुःखमोहरूपेण परिणतस्य सत्वादिगुणत्रयस्यैव साक्षाद्भोग्यत्वात्तस्मिन्नपि भोग्ये यः पुंसोऽभिलाषजनकस्स तस्माद्विषयगुणादिरूपेण बुद्धावुदितात्सत्वादिगुणत्रयाद्भोग्यरूपादन्यो ग्राहकगतो रागो मन्तव्यः । भोग्यस्यैवाऽभिलाषजनकत्वे वीतरागाभावप्रसङ्ग इति भावः । तदुक्तं तत्वसंग्रहे भोग्यविशेषे रागेन हि कश्चिद्वीतरागस्स्यादिति । यद्येवमवैराग्यलक्षणो बुद्धिधर्म एव रागोऽस्त्वत आह । रूपेप्येतद्धि दूषणमिति । अयमभिप्रायः । अवैराग्यलक्षणस्य रूपस्य तावद्वासनारूपत्वान्न कार्यकरत्वम् । वासनावस्थायामपि कार्यकरत्वे बुद्धेरनन्तवासनायोगेन पुंसो युगपद्विरुद्धाऽनन्तप्रतिपत्तिवैशसप्रस-

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

क्रात् । प्रत्ययात्मना स्थूलरूपेण भोग्यदशामापन्नेन तस्मिन् रागेऽभ्युपगम्यमानेऽपि प्राग्वद्वीतरागाभावप्रसङ्ग इति तयोरन्यो रागोऽभ्युपगन्तव्य इति, कर्मैव रञ्जकमस्त्विति चेन्न । तस्य कृष्यादिवत्फलजनन एव चरितार्थत्वात्कार्यान्तरहेतुत्वे प्रमाणाभावादनेकतत्वपरिकल्पनाभावप्रसङ्गाच्च ॥

अथ विद्यासिद्धिः ॥

करणं न विना कर्तुः कृतिः कर्मणि दृश्यते ।
अतोऽस्ति करणं विद्या बुद्धिबोधविवेचिनी ॥

प्रोक्तवादिन्द्रियाणां विषयोपस्थापकत्वेनोपयोगात् । तस्मिन् बुद्धिबोधाख्ये कर्मणि ग्राह्ये ग्रहणक्रियायां पुंसः केनाऽपि करणेन भवितव्यं । यत्तत्करणं सा विद्येति । अत्र परः ॥

प्रदीपवन्मतिस्तस्य स्वपरात्मप्रकाशिका ।
विद्यते करणं पुंसो विद्यया किङ्करिष्यति ॥

बुद्धेः प्रकाशरूपत्वात्प्रदीपवद्विषयाकारं स्वात्मानमपि प्रकाशयतीति न करणान्तरसिद्धिः । परिहरति ।

प्रदीपः करणं पुंसस्तंभाद्यर्थोपलब्धिषु ।
दीपोपलब्धौ चक्षुश्च बुद्धावप्येवमिष्यताम् ॥

बुद्धेरपि ग्राह्यत्वेन कर्मत्वात्करणापेक्षाऽस्तीति उक्तमिति

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

भाव: उक्तं च तत्वसङ्ग्रहे 'रविवत्प्रकाशरूपो यदिनाम महांस्तथाऽपि कर्मत्वात् । करणान्तरसापेक्षश्शक्तो ग्राहयितुमात्मानम्' इति ॥

एतदेव दर्शयति ।

त्रैगुण्यात्सा विवेकेन शक्ता दर्शयितुं न हि ।
विषयाकारमात्मानमविविक्ता यतस्स्वयम् ॥

विद्या गुणपरा वेद्यं विविक्तातो विवेकतः ।
शक्ता दर्शयितुं पुंसो नाऽत्र कार्योऽतिमत्सरः ॥

बुद्धेस्त्रिगुणात्मकत्वेन भोग्याकारविवेकात्कर्मतया न स्वात्मप्रकाशकत्वं प्रदीपादिवत् । विद्या तु तदतीतत्वेन भोग्याकाराद्विविक्ता सती पुंसो वेद्यं करणान्तरनिरपेक्षा प्रकाशयत्येवेति । अथ कलाया व्यापारः कथ्यते ।

कर्मादिकारकानीकप्रयोक्ता भोगसिद्धये ।
स्वतन्त्रः पुरुषः कर्ता कला तस्य प्रयोजिका ॥

भोक्तृत्वेन भोगार्थं बुद्ध्यादिकारकव्रातप्रयोक्तृत्वात्कर्ता पुरुष इत्युक्तम् । प्रवृत्तौ च निवृत्तौ च कारकाणां य ईश्वरः । अप्रवृत्तः प्रवृत्तौ वा स कर्ता नाम कारकः इति । तस्य च भोगक्रियायां वक्ष्यमाणवत्सामर्थ्योपोद्बलनेन प्रयोजिका कल

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

शास्त्रेपूच्यते। ननु अकर्तैव पुरुष इति सांख्याः। तदयुक्तमित्याह।

अकर्तृत्वाऽभ्युपगमे भोक्तृशब्दो निरर्थकः।
उपादानप्रवृत्तेश्च निष्फलत्वं प्रसज्यते॥ ९८॥

भोगस्याऽपि क्रियात्वाद्भोक्तृत्वेनैव पुंसः कर्तृत्वं सिद्ध्यति। तस्मिन्नकर्तर्यभ्युपगम्यमाने तद्भोगार्थं प्रधानस्याऽपि प्रवृत्तिर्निष्फला स्यात्। अकर्तरि करणादिसंबन्धस्य निरर्थकत्वात्। किं च

कर्तृमत्कर्मदेवादि क्रियासाधनभावतः।
वास्यादिवदतः कर्ता परिज्ञेयो विभुः पुमान्॥

अविभुत्वे ह्यात्मनो गगनादिवदमूर्तत्वाद्देशान्तरनयनाऽसंभवेन दाक्षिणात्यादेः काश्मीरादौ दृश्यमानः देशान्तरफलभोगोऽनुपपन्नः इति तदन्यथाऽनुपपत्त्याऽऽत्मा व्यापकोऽभ्युपगन्तव्यः। इति। उक्तं च श्रीमत्पराख्यादौ कर्तृशक्तिं व्यनक्त्यस्य कलास्यातः प्रयोजिका। ततः कला समायुक्तो भोगेऽणुः कर्तृकारक इति। अस्य कर्तुः पुंसः कर्तृशक्तिश्शक्तेरेकत्वात्ज्ञानक्रियाशक्तिर्वक्ष्यमाणवत् मलावृतत्वेनार्थेषु न प्रवर्तते इति प्रदीपवत्प्रकाशरूपा कलैकदेशे

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

मलविदारणेन तामभिव्यनक्ति प्रकाशयति ततस्सा प्रयोजिका हेतुः कर्त्री भण्यते। स चाणुः पुरुषस्तयाऽत्यन्ताविवेकेन भासमानो भोगक्रियाया कर्तृकारकमुच्यते। स हि भोक्तृत्वात्कर्ता कला तु तत्प्रयोजिकात्वात्कारकमिति। तदुक्तं श्रीमन्मृगेन्द्रे इत्येतदुभयं विप्रास्संभूयाऽनन्यवत्स्थितं भोगक्रियाविधौ जन्तोर्निर्जगुः कर्तृकारकमिति। अन्यथा हि।

व्यक्तिकर्त्रनपेक्षस्य कर्तृभावे समीहिते।
आत्मनः प्राक्कलायोगात्प्रसक्ता सर्वकर्तृता।
सर्वकर्तृत्वसंबन्धात्सर्वज्ञः परमेशवत्।
सर्वज्ञत्वादयुक्तास्य स्वात्मदुःखाय कर्तृता॥

आत्मनो हि निर्मलत्वेन कलानपेक्षस्यैव कर्तृत्वेऽभ्युपगम्यमाने शिववत्कलादिपाशात्मकशरीरसंबन्धं विनैव सर्वकर्तृत्वं अज्ञातस्य करणासंभवेन सर्वज्ञत्वं च भवेत्। निरावरणत्वेन शिवेनाऽनधिष्ठितस्य स्वतन्त्रस्याऽस्य स्वात्मन एव दुःखाय शरीरादिकर्तृत्वं न युज्यते। अतोऽस्य सुखोत्पादादौ पारतन्त्र्यदर्शनात् बद्धत्वं समलत्वं च निश्चीयते। तत एव चाऽस्यासर्वकर्तृत्वं असर्वज्ञत्वं च संसारावस्थायां दृश्यते।

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

ततो मलावृतत्वादस्य भोगे विषये किंचिज्ज्ञत्वकर्तृत्वयोरपि कलानुग्रहापेक्षा सिद्धेत्याह ।

न चास्य सर्वकर्तृत्वं बद्धत्वाद्गोवृषादिवत् ।
कलानुग्रहसापेक्षा भोगे तेनाऽस्य कर्तृता ॥

इत्थं कलां प्रसाद्ध्य तस्या एव विद्यारागाव्यक्तानामुद्भव इत्याह ।

स्कन्धोऽपरः कलायास्तु यस्मादेताः प्रजज्ञिरे ।
विद्यारागप्रकृतयो युग्मायुग्मक्रमेण तु ॥१०१॥

युग्मक्रमेण रागविद्ये सहैव जायेते। अव्यक्तं तु पृथगयुग्मक्रमेणेत्यर्थः । उक्तं च श्रीमद्रौरवे 'कलातत्त्वाद्रागविद्ये द्वे तत्त्वे संबभूवतुः । अव्यक्तं च' इति । अत्र कर्मफलभोगस्य कालाऽवच्छेदं भोक्तृनियमं च विनाऽनुत्पत्तेः कालनियत्याख्यं तत्त्वद्वयमागमेषु श्रूयमाणं अर्थसिद्धत्वादाचार्येणाऽनुपात्तम् । तथाहि कृष्यादिवत्कर्मफलानां राजनियमाऽभावे दस्युभिरपहारदर्शनात् । ज्योतिष्टोमादिकर्मफलानामपि भोक्तृप्रतिनियामकेन केनाऽपि भाव्यमेति तन्नियामकत्वेन नियतिस्सिद्धा । कर्मणो नियामकत्वमस्तीति चेत्तन्न । तस्य फलजनन एव चरितार्थत्वादित्युक्तम् । ईश्वरशक्तेरपि तत्त्वान्तर-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

व्यवधानेनैव भोगविषये कार्यकरत्वम् । अन्यथा सर्वतत्वाभावप्रसङ्गात् । किं च चिरक्षिप्रादिप्रत्ययद्वारेण चिरं भुङ्क्ते इत्यादिभोग्याद्यवच्छेदकत्वेन कालस्सिद्धः । स च नैयायिकाद्यभ्युपगतवन्नित्यो भवितुमर्हति । भूतादिरूपत्वेनानेकत्वादचेतनत्वाच्च । तदुक्तं श्रीमन्मृगेन्द्रे 'तुट्यादिप्रत्ययस्यार्थः कालो मायासमुद्भवः । कलयन्नासमुत्थानान्नियत्या नियतं पशुं' इति ।

इत्थं सूक्ष्मदेहात्मिकां तत्वसंहतिमुक्त्वा तस्याः प्रतिपुरुषं नियतत्वमाह ।

वसुधादिकलाप्रान्ता भोगसाधनसंहतिः ।
नियता प्रतिभोक्तारं परिज्ञेया मनीषिभिः ॥

तदुक्तं तत्वसंग्रहे। वसुधाद्यस्तत्वगणः प्रतिपुंनियतः कलान्तोऽयम् । पर्यटति कर्मवशतो भुवनजदेहेष्वयं च सर्वेषु इति । एकत्वे सूक्ष्मदेहस्य सर्वेषां दृश्यमानभोगभेदो न युक्त इत्याह

अन्यथा हि सुखादीनां दृष्टो भेदो न युज्यते ।

नन्वेकत्वेऽपि सूक्ष्मदेहस्य कर्मभेदादेव तत्फलभोगभेदो भविष्यतीति चेत्तदयुक्तमित्याह ।

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

योक्ष्यते कर्मणो भेदात्तद्भेदो यदि योक्ष्यते ॥

कर्मभेदादेव भोगभेदस्सिद्ध्यति । सिद्धे च भोगभेदे कर्मभेदोऽनुमीयते इति इतरेतराश्रयदोषः प्रसक्त इत्यर्थः ।

ननु कर्तृभेदादेव सिद्धः कर्मभेदः कर्मभेदाच्च भोगभेद इति नान्योन्याश्रयदोषोऽत आह ।

संबन्धाद्युगपत्सा तु कुर्वन्ती कर्मकर्तृभिः ।
कथं भिन्नानि कर्माणि कर्तृभेदात्करिष्यति ॥

मलावृतत्वेनाऽऽत्मनां कलादिसूक्ष्मदेहादिसंबन्धं विना कर्मकर्तृत्वाऽनुपपत्तेः । युगपत्सर्वकर्तृसंबन्धेन कर्म कुर्वाणा सा सूक्ष्मदेहरूपा तत्वसंहतिरेकरूपा कथं भिन्नानि विचित्राणि कर्माणि करोति नैवेत्यर्थः । ननु प्रतिपुरुषं चिकीर्षाभेदात्कर्मभेद इति चेत्तन्न । चिकीर्षायाश्च सूक्ष्मदेहसंबन्धादेवोत्पत्तेः । तस्याश्चैकत्वाच्चिकीर्षाभेदोऽप्यनुपपन्न इति परिदृश्यमानभोगभेदान्यथाऽनुपपत्त्या प्रतिपुरुषं सूक्ष्मदेहभेदोऽवश्यमभ्युपगन्तव्यः ।

ननु आत्मभेदे हि सूक्ष्मदेहभेदो युक्तः । स एव तावदेक इति वेदान्तविदस्तत्राऽऽह—

आत्मनामप्यनेकत्वमत एव प्रतीयते ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

एकत्वे ह्यात्मनस्सुखदुःखादिवैचित्र्यं जन्ममरणवैचित्र्यं चाऽनुपपन्नमिति भोगवैचित्र्यादेवाऽऽत्मनानात्वसिद्धिः। एष चाद्वैतनिरासोऽस्माभिर्मृगेन्द्रवृत्तिदीपिकायां विस्तरेण दर्शितः।

अथ किमियं सूक्ष्मदेहरूपा तत्वसंहतिरात्मवद्व्यापिका, आहोस्विदव्यापिकेत्यत आह—

तस्याश्चाविभुता सिद्धा युगपद्वृत्त्यसंभवात् ॥

ज्ञानक्रियाभिव्यक्तिलक्षणस्य तत्कार्यस्य सर्वत्र युगपदनुत्पत्तेः तस्याश्चाव्यापकत्वसिद्धिः। ननु यत्र सहकारिणा कर्मणा फलारम्भेण निर्देशो भवति तत्रैवासावात्मनश्चैतन्याभिव्यक्तये विक्षोभमभिव्यञ्जनरूपं करोतीति तस्मादेवास्यास्सर्वत्र युगपत्कार्यानुत्पत्तिर्नाव्यापकत्वादिति चेत्। तदप्ययुक्तं तस्याः कार्यत्वेनाऽनित्यत्वात्। घटादिवद्व्यापकत्वाऽसिद्धेरित्यभिप्रायेणाह—

कर्मनिर्देशविक्षोभकरणत्वं च नोत्तरम्।
युगपद्वृत्त्यनुत्पत्तेस्सर्वत्र विभुतैव न ॥ १०६ ॥

अथ किमियमेकदेशे चैतन्याभिव्यक्तिस्सूक्ष्मदेहव्यञ्जकस्याऽविभुत्वात् उत व्यञ्ज्यस्याऽऽत्मन इत्यत आह—

विकारित्वादिधर्म्यात्मा विरोधश्च श्रुतेरणौ।
अविभौ युगपच्चित्वव्यक्तिकालेप्यणुर्विभुः ॥

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

यद्यव्यापक आत्मा स्यात् तदा देशान्तरफलोपभोगोऽप्यनुपपन्न इत्युक्तम् । किं च तस्य मुक्त्यवस्थायां शिववत्सर्वज्ञत्वसर्वकर्तृकत्वश्रवणात् व्यापकत्वमवश्यमभ्युपेयम् । अथ संसारावस्थायामव्यापकत्वं मुक्त्यवस्थायां च व्यापकत्वं तस्येष्यते तदा परिणामित्वाचेतनत्वादिदोषप्रसङ्गः ततो नित्यत्वव्यापकत्वादिश्रुतेर्विरोधः । तदुक्तं श्रीमन्मृगेन्द्रे 'चैतन्यं दृक्क्रियारूपं तदस्त्यात्मनि सर्वदा । सर्वतश्च यतो मुक्तौ श्रूयते सर्वतोमुखम् ॥' इति । नाव्यापको न क्षणिको नैको नापि जडात्मक इति च ।

इत्थं सूक्ष्मदेहात्मिकामसाधारणतत्वसृष्टिमुक्त्वा भुवनात्मिकां साधारणतत्वसृष्टिमाह—

तत्वानामपरे स्कन्धा भोगिनो रतिभूमयः ।

सूक्ष्मदेहरूपाद्भोगादन्ये विचित्रभुवनाद्याकारास्तत्वानां भोगास्संसारिणः भोगस्थानानीत्यर्थः ।

अतश्च,

तज्जदेहप्रविष्टा सा तेषां तासु फलावहा ॥

सूक्ष्मदेहात्मिका तत्वसंहतिराचारापेक्षया तासु भोगभूमिषु कर्मवशात्तत्तद्भुवनजदेहेषु प्रविष्टा सती पुरुषस्यैकदेशेन ज्ञानक्रियासामर्थ्यांशाभिव्यञ्जिका भवति । तदुक्तं तत्वस-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

ङ्गेहे 'पर्यटति कर्मवशतो भुवनजदेहेष्वयं च सर्वेषु' इति। श्रीमन्मृगेन्द्रेऽपि 'इत्यातिवाहिकमिदं वपुरस्य जन्तोश्चित्सङ्क्चिद्दहनगर्भविवर्तिलेशात्। नैतावतालमिति भौवनतत्वपाङ्क्तिमाचारदेहविषयाऽभ्युदयाय वक्ष्ये। इति।

तामेव भुवनसृष्टिं संक्षेपेण दर्शयति—

निरयादिस्तु सत्यान्ता कालहाटकदेशिकैः॥
आदिमध्यान्तसंरुद्धा भूतेषु स्थानपद्धतिः॥

तत्र कालः कालाग्निः हाटकः पाताळाधिपतिः। देशिकः समस्तशास्त्रोपदेशकत्वाल्लोकाचार्यस्सत्यलोकोर्ध्वस्थितस्य विष्णुलोकस्याप्युपरि वर्तते। रुद्रलोके वर्तमानोऽनन्तशिष्यः श्रीकण्ठस्तस्यैव ब्रह्माण्डान्तराधिकारात्तैः कालहाटकदेशिकैः स्वस्वभुवनवर्तिष्वादिमध्यान्तेष्वधिष्ठिता नरकपाताळभूरादिलोकात्मिका भुवनपद्धतिस्स्थूलेषु ब्रह्माण्डान्तर्वर्तिषु स्थिता ततश्च

शतरुद्रविभुश्चापि सहपश्चभिरष्टकैः।
मात्रासंभूतभूतेषु प्रोक्तभूतविधातृषु॥ ११०॥
तन्मात्रा चित्तवर्गेषु

तत्र शतरुद्राणां ब्रह्माण्डधारकाणामधिष्ठाता वीरभद्रः पृथिवीतत्वे प्रागुक्तस्थूलपृथिवीकारणभूते तन्मात्राऽजन्ये

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सूक्ष्मपृथिवीतत्वे स्थित: । तथा स्थूलजलादिकारणभूते तन्मात्राजन्ये एव सूक्ष्मजलादिभूतचतुष्टये चित्तवर्गशब्दे-नान्त:करणानामुपादानात्तन्मात्राद्यहङ्कारान्ते चाऽध्वनि गुह्या-तिगुह्यगुह्यतरपवित्रेस्थाण्वाख्यानि पञ्चाष्टकानि भुवनानां स्थितानि । तदुक्तं श्रीमन्नन्दिकेश्वरकारिकासु 'ब्रह्मा स्थूलानि गत: सूक्ष्मादीन्याधारदेहभोग्यार्थी । रुद्रशतं क्षेत्रभुवां चत्वारिं-शच्च सूक्ष्मभूतानि । तन्मात्रा मनोऽहङ्कृतिबुद्धिर्देवा गुणांस्तु योगिवरा: । वामाद्या गुणसारं क्रोधा: प्रकृतिं कलान्तुमण्ड-लिन इति । अत एवाऽऽह—

बुद्धौ च क्रमशो न्यसेत् ।
पैशाचाद्यष्टकं विद्वान् गुणतत्वे कृतादिकम् ॥

अप्राप्तगुणभावे तु विशुद्धे गुणमस्तके ।
विकारे प्राकृते लीना वामादिस्थानमालिका ॥

क्रोधेश्वररुद्राणां पुरपङ्क्तिः प्रधानगा ।

वामदेवादयस्त्रयोदश रुद्रा: क्रोधेशादिभिरष्टभिस्सह प्रधा-नाऽधिपैर्गुणमस्तकभुवनेषु स्थिता: । प्रकृतेस्सूक्ष्मरूपत्वाद्भुवना-ऽऽधारत्वाऽयोगात् । इत्यागमविद: । तथा

मण्डलानि तु वामाष्टौ कलातत्वे स्थितानि तु ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

रागविद्यासहिते कलातत्त्वेऽष्टाष्टक्रमेणाष्टौ भुवनानां मण्डलानि स्थितानि। तदुक्तं श्रीमन्मृगेन्द्रे रागविद्यागर्भे कलापदे महापुरचतुष्षष्टिमण्डले मण्डलाधिपा इति। कालनियत्योश्च भुवनद्वयं तत्रैवोक्तं नियतौ स्थितो नियतः काले कलनशक्तिमान् इति। एष च भुवनाध्वा पद्धत्यादिषु बहुशो दृश्यत इति नात्र विस्तरेण प्रदर्शितः। तेषु चाऽवान्तरभुवनसंख्याभेदः। केषुचित्केषांचिदन्तर्भावादित्यविरोधः।

इत्थं भुवनात्मिकामपि तत्त्वसृष्टिमुक्त्वा प्रोक्तस्य कलादिरूपस्य जगतः परमोपादानं मायां साधयति।

जगद्बीजं महामाया जन्यशक्तिरचेतना॥
तस्याः कलादिसंभूतिर्भोगिनां भोगभूतये।

महतीचासावनेकस्रोतोरूपस्वकार्यव्याप्तेर्माया च मात्यस्यां प्रळये सर्वमशुद्धं जगदिति माया। सा च जगद्बीजं जगतः कलादिरूपस्य प्रतिपुरुषं भेदेनाऽनेकत्वाद्भुवनाऽऽधारत्वाच्च कार्यरूपस्य सर्वस्य साक्षात्परम्परया चोपादानम्। अत एव जन्यशक्तिस्सूक्ष्मरूपस्वकार्यशक्तिसमाहाराऽऽत्मिका सत्कार्यवादाऽभ्युपगमेन सर्वकार्याणां शक्तिरूपेण तत्राऽवस्थानादुपादानत्वादेव मृदादिवदचेतनता च ततस्तस्याः कलादिभोग-

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

साधनसंभूतिरित्युक्तम् । शक्तिसमाहारात्मकतामेवाऽस्याः प्रकटयति—

अनेकाभिर्विचित्राभिश्शक्तिभिश्शक्तिमत्यसौ
विचित्राऽनन्तकार्याणां दर्शनात्संप्रतीयते ।

विचित्राऽनन्तकार्योत्पत्तिदर्शनाद्विचित्रानन्तकार्यशक्तिसमाहारात्मिकाऽसौ ज्ञायते ।

नन्वस्या एवाऽनेककार्यजनिकाऽनेकाश्शक्तयः कल्प्याः तस्यास्स्वयं शक्तिरूपत्वाच्छक्तेश्च शक्त्यन्तरकल्पनाऽनुपपत्तेः परमकारणत्वादेवाऽस्या नित्यत्वं अन्यथाऽनवस्थाप्रसङ्गादित्यभिप्रायेणाऽऽह—

अचिद्रूतामनेकत्वाद्विनाशित्वं सुनिश्चितम् ॥
नाऽनेका सात्वतो नित्या माया यद्यप्यचेतना ।

किं च,

व्यापिनी पुरुषाऽनन्त्याद्भोगाय कुरुते यतः ॥
सर्वकार्याणि सर्वत्र स्रोतोभिर्विश्वधामभिः ।

तदुक्तं बृहस्पतिपादैः ' अपि सर्वसिद्धवाचः क्षीयेरन्दीर्घकालमुद्गीर्णाः । मायायामानन्त्यान्नोच्यते स्रोतसां सख्या । इति एषा च क्षीरदधिन्यायेन न सर्वात्मना परिणाममेति किं तु घृतकीटन्यायेन एकदेशेनेति मन्तव्यम् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सर्गस्थितिलयास्तस्यास्स्वात्मसंस्थाः प्रकीर्तिताः ॥
स्वात्मसंस्थं विकारस्य तत्वादिभुवनाऽवधेः ।

एवं परमोपादानत्वान्मायास्था एव जगतस्सर्गादयः भुवनादेश्च विकारस्य तत्त्वादिस्वरूपं स्वात्मसंस्थमिति तत्वभावभूतभुवनात्मकं च समस्तं जगद्विकारस्थमेव ज्ञेयम् । ननु शुद्धरूपमपि तत्वादिकं तदुपादानं च बिन्दुसंज्ञमागमेषु श्रूयते। सत्यं। तत्प्राप्तेर्विद्येश्वरादिपदप्राप्तिरूपत्वेनाऽपरमुक्तित्वान्नाऽत्राऽस्य भोगसाधनतयोपादानमित्यविरोधः ।

अत्र च,

सर्गस्थितीसमाख्याते लयस्सर्गविपर्ययात् ॥

प्रतितत्वमुत्पत्तिक्रमकथनेन व्यापारप्रदर्शनेन च सर्गस्थिती प्रोक्ते । लयस्तु सर्गप्रातिलोम्येन स्वस्वकारणेषूपसंहार इत्यर्थः ।

एतच्च,

भवस्यानादिमत्वाच्च सर्गादिगणनाच्युतम् ।

अनादिरयं संसार इत्यर्थः । ननु भोगसाधनत्वादात्मनां युक्ते सर्गस्थिती । लयस्तु किमर्थमीश्वरेण क्रियते । अत्र वदामः अनवरतमनन्तपुरुषभोगजननोपचितशक्तेर्मायायास्सुकुमारवनिताया इव स्वापेन सामर्थ्योपोद्बलनार्थमात्मनां

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

विश्रमार्थं च कर्मपाकार्थं च संहार इत्यदोषः। तदुक्तं श्रीमन्मृगेन्द्रे। 'तत्र सात्मकमाक्रम्य विश्रमायाऽवतिष्ठते। भविनां भव खिन्नानां सर्वभूतहितो यतः' स्वापे व्यास्ते बोधयन् बोधयोग्यान् रोध्यान् रुन्धन् पाचयन् कर्मिकर्म। मायाशक्तीर्व्यक्तियोग्याः प्रकुर्वन् पश्यन् सर्वं यद्यथावस्तुजातम् इति। इत्थमात्मनः प्रतिपादितं ससाधनं भोगमुपसंहर्तुं तस्यैव मलात्मकं पाशमुपक्षेप्तुं चाह—

पुंसां मायामयं भोग्यं मायोत्थैरेव साधनैः।
यतो भोक्ता विशुद्धात्मा चेतनस्तन्न चेतनम्।

उक्तवत्सुखादिरूपं बुद्धिबोधात्मकं भोग्यं मायाकार्यमेव। न त्वात्मनि गुणत्वेन समवैति। चेतनत्वात्। तत्समवाये पुरुषस्य परिणामादिदोषप्रसङ्गाच्च। तस्य च चेतनः पुरुष एव भोक्तेत्युक्तम्। स च वक्ष्यमाणवदविशुद्धत्वादावृतज्ञानक्रियात्वान्मायोत्थैः कलादिभिस्तत्त्वैरुपबृंहित एव तद्भोक्तुं शक्नोति। कार्यकारणं विना किंचिज्ज्ञत्वादेरप्यदर्शनात्।

अथ कुतोऽयमविशुद्धात्माऽत आह—

विषयित्वमलच्छन्नसर्वज्ञानक्रियो यतः॥

यतोऽयमात्मा शिववत्सर्वज्ञानक्रियायुक्तोऽपि किंचिद्विषये विज्ञानादौ कलादिकमपेक्षते। यतश्च मुक्तस्याऽभोक्तृत्वं

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सर्वविषयज्ञानादियुक्तत्वं श्रूयते ततोऽयं विषयित्वाख्य भोक्तृत्वस्य हेतुत्वाद्विषयित्वाख्येन मलेनावृतोऽवसीयते । यच्छ्रूयते 'भोक्तृत्वं मलतः प्रोक्तम्' इति । अत एवाऽयमविशुद्धः तदुक्तं श्रीमत्स्वायंभुवे । 'यद्यशुद्धिर्न पुंसोऽस्ति सक्तिर्भोगेषु किंकृते' ति ।

अतश्च,

बीजस्थकर्मरागेण मायामेषोऽनुधावति ।

कर्मणः कृष्यादिवदात्मसंस्कारत्वाऽयोगात् । भवावस्थायां बुद्धिगतेन प्रळये नष्टबुद्धेरपि मायात्मनि जगद्बीजे प्रतिसंचारात्तत्स्थेन परिपाकवशाद्भोगजनकेन कर्मात्मना रागेण मार्गेण मायां भोगसाधनादिरूपेण परिणतामेषपुमाननुसरति ।

अत्र परः,

भवान्तरकृतं कर्म जात्यादिफलदं नृणाम् ।
अशुद्धिः कल्पितापुंसस्तस्मिन् सत्यतिरिच्यते ॥

अनादित्वेन बीजाङ्कुरन्यायेन कार्यशरीरबन्धस्यावस्थितेर्जात्यायुर्भोगप्रदानि कर्माण्येव स्वफलभोगार्थमात्मनश्शरीरयोगं कुर्वन्तु । किं मलेन भवताऽपि हितं मलं कल्पयित्वा भोगवैचित्र्यान्यथानुपपत्त्या कर्माऽपि कल्प्यते ततः कल्प-

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

नागौरवप्रसङ्गात् कर्मैव कल्प्यताम् यदाहुः 'कल्प्यं पुनर्निरुणद्धि कल्पनामिति ।'

अत्र परिहारः ।

जन्मादिजनिका शक्तिः कर्मणो न मलं विना ।
अणुरज्ञानरहितः क्वचिज्जातो न दृश्यते ॥१२२॥

अज्ञानहेतुना मलेन रहितस्य मुक्तात्मनो जन्मादर्शनात् कर्मानुष्ठानादर्शनाच्च मलयुक्तस्यैव कर्मार्जनं तद्भोगो वा उपयुज्यते । यद्येवं मलस्यैव जन्मादिहेतुत्वमस्तु किं कर्मणेति चोदयति ।

विषयित्वं हि तस्यैकमस्तु किं तेन कर्मणा ।
यतो जन्मादिसंबन्धमनुसंप्राप्नुयाद्भवम् ॥

परिहरति—

सन्ति केवलिनो ज्ञानग्रस्ताः कर्मविनाकृताः ।
न च जन्मादिसंबन्धो द्वयं तेनेह कारणम् ॥

विज्ञानकेवलिनां मलावृतानामपि कर्मरहितानां जन्माद्यदर्शनात् द्वयमपि मायायोगे हेतुरित्यर्थः । ननु सृष्टेः प्राक् निष्कलत्वाच्चेतनत्वाच्चात्मनश्शिववदज्ञत्वं न युज्यते इति पराशङ्कां निरस्यति—

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

प्राक्सृष्टेर्निष्कलो जन्तुर्दृक्क्रियागुणवान्यतः।
ततश्चाज्ञानसम्बन्धो नायमित्यनृतं वचः॥

यद्येवं शिववदेव कलासम्बन्धोऽप्यस्य न युज्यते ततश्च कलासम्बन्धाऽन्यथाऽनुपपत्त्या तस्य मलोऽभ्युपगन्तव्य इत्यर्थः। एतदेवाह—

दृक्क्रिये सर्वविषये सर्वगत्वादणोर्मते।
सर्वज्ञः सर्वकृत्तस्मात्सुतृप्तः कारणं विना॥

न चैतदेवं किञ्चिज्ज्ञात्वादावपि कलाद्यपेक्षित्वादित्याह—

कलादिव्यञ्जकाभावान्नव्यक्ते तस्य दृक्क्रिये।

न चैतदनावरणस्य युज्यते इत्याह—

न ह्यनावरणं तेजो भानोर्व्यञ्जकमीक्षते॥ २७॥

अतश्च।

अनाद्यनादिसम्बन्धो मलः साधारणोऽक्षयः।

अनादिश्चासावात्मनां अनादिसंबन्धश्चानाद्यावारकः सर्वपुरुषाणामेक एव। अत एव नित्यश्च मलोऽभ्युपगन्तव्यः। यद्येवं मलस्य नित्यत्वात्कदाचिदप्यात्मभ्यो न निवृत्तिः। निवृत्तौ वा तस्यैकत्वादेकपुरुषमोक्षकाले सर्वमोक्षप्रसक्तिरत आह—

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

प्रतिपुंनियतः स्वस्वकालव्यावृत्तशक्तिकः ॥

मलस्य प्रत्यात्मनियतानन्तशक्तियुक्तत्वादेकस्याः शक्तेः परिणामवशान्निरोधे कृते तस्यैव मोक्षो नान्यस्य (यच्छ्रूयते) प्रत्यात्मस्थस्वकालान्तोपाधिशक्तिसमूहवदिति । ननु प्राकृत एव विपर्ययरूपो महामोहाख्यो मलोऽस्तु तस्यास्तत एव व्यञ्जकापेक्षा कर्मानुष्ठानं चोपपद्यते । अत आह—

महामोहोद्भवात्पूर्वमणुरेष निरञ्जनः ।
न शक्योज्झयितुं तेनासंवृतः शर्ववत्स्वयम् ॥

महामोहस्य कलादिसम्बन्धोत्तरकालभावित्वात्प्रथमतः सर्गारम्भे भवत्पक्षे निर्मलत्वेन शिववदनावृतः पुमांस्तेन प्राकृतमलेनोज्झयितुं न शक्यते । अतोऽनादिना मलेनात्मनोऽनादिसंबन्धोऽभ्युपगन्तव्यः । अन्यथा तु ।

आदिमान्यदि सम्बन्ध इष्टः पुंमलयोर्बुधाः ।
तस्यापि कारणं वाच्यमिति नास्ति व्यवस्थितिः॥

अथ निर्हेतुको योगः कलायोगोऽप्यहेतुकः ।
अनिर्मोक्षश्च जन्तूनामीशाभावश्च जायते ॥

निर्हेतुकस्य पाशसंसर्गस्याभ्युपगमे शरीरादियोगस्याऽपि निर्हेतुकत्वान्मुक्तस्यापि पुनस्संसारयोगादनिर्मोक्षः । शिव-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

माऽपि पाशसंसर्गादनीश्वरत्वं प्रसज्यते । अतोऽनादिरेव मलसम्बन्धः पशोस्संसारहेतुरभ्युपेयः । एवं मलस्याऽसाधारणत्वे प्रतिपुरुषमनेकत्वेऽभ्युपगम्यमाने जडत्वे सत्यनेकत्वाद्घटादिवदनित्यत्वप्रसङ्गः । ततश्चानादित्वाभावात्प्रागुक्तोऽनवस्थानानिर्मोक्षादिदोषस्स्यादित्याह—

असामान्यो यदि भवेच्चैतन्येष्वनेकतः ।
उत्पादवान्विनाशी च ततः पूर्वोक्तदोषभाक् ॥

अनादित्वादेव चास्य नान्तवत्त्वं तद्योगे वा सर्वानित्यत्वप्रसङ्ग इत्याह—

अनाद्यनादिसम्बन्धो यदि चेष्टो विनश्वरः ।
मायाशिवात्मवस्तूनामजानां नाश इष्यताम् ॥

इत्थं प्राक् प्रतिज्ञातं मलस्यानादित्वं साधारणत्वमक्षयत्वं च प्रसाध्यानन्तशक्तियुक्तत्वमपि साधयति—

प्रतिपुंनियताश्चास्य शक्तयो गुणरोधिकाः ।

आत्मगुणस्य ज्ञानक्रियात्मनो रोधिकाः । एतच्च प्रागेव दर्शितम् । परिदृश्यमानभोगवैचित्र्यान्यथाऽनुपपत्त्या तासां मलशक्तीनां परिणामकाले वैचित्र्यं सिद्धमित्याह—

न कालनियतिस्तासां विनिवृत्त्यै निरोधतः ॥

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

अन्यथा युगपन्मुक्तिस्सर्वेषां चिद्वतां भवेत् ।
न च सा दृश्यते तस्माज्ज्ञेयास्तास्सूक्ष्मलक्षणाः ॥

एवं चानाद्याधारकत्वान्मल एवाऽऽत्मनस्सहजः पाशः । मायाद्यस्तु तद्भावभाविनो भावाः सर्वे मायात्मकाः पशोरित्यादिश्रीमत्स्वायंभुवादिश्रुतेरागन्तुका एव ज्ञेयाः । ननु श्रीमन्मतङ्गादौ तु 'मोहो मदश्च रागश्च विषादश्शोष' इत्यादिना मोहादीनामपि मलहेतुत्वं सहजमलत्वं च श्रूयते । अत आह—

सृष्टयो विषयित्वस्य मदाद्याः पञ्च नोदिताः ।
निष्कलात्मनि तस्यैते नो दृष्टा जातु चिद्यतः ॥

यतो विज्ञानाकलप्रलयाकलयोः कलादिसम्बन्धरहिततया मले सत्यपि वक्ष्यमाणमदादयो न दृश्यन्ते । किं तु सकल एव । अतो न मलस्यैते ज्ञानक्रियावरणवृत्तित्वेनेष्टाः । श्रीमन्मतङ्गादौ तु मलसद्भाव एव मायोपादानानामनात्मादावात्माभिमानादिरूपाणामेषां मदादीनामुत्पद्यमानत्वात्कलादियोगेऽपि निर्मलानां मायागर्भाधिकार्यादीनां तदद्दर्शनाच्च तेन मलेन सहकारिणा जायन्त इति सहजमलहेतुत्वात्सहजशब्देनोच्यन्ते । न तु मलोपादानतयेत्यविरोधः ।

ननु मलोपादाना अप्येते प्रलयकेवलावस्थायामनभिव्यक्ताः

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

पश्चात्कलादिसम्बन्धादभिव्यज्यन्त इत्यस्य पक्षस्य को दोषोऽत आह—

भोगसाधनसम्बन्धाद्व्यज्यन्त इति नोचितम् ।
त्वया तु गुणवृत्तिभ्यो येनोक्ताभिन्नलक्षणाः ॥
भवता गुणवृत्तिभ्यो भेदेनैव मदादयः ।

प्रोक्ता इति । न तेषां भोगसाधनसम्बन्धात्पश्चादभिव्यक्तिरुत्पद्यते । एतदुक्तं भवति । मदादीनां हि मलोपादानत्वेऽभ्युपगम्यमाने तस्य सर्वदैकरूपत्वादभिव्यक्त्यनभिव्यक्तिभेदानुत्पत्तेस्तत्कार्यभूतज्ञानाक्रियावरणवत्संहारावस्थायामप्युपलभ्येरन् । न चोपलभ्यन्ते । अपि तु भोगसाधनसंबन्धोत्तरकालमन्तःकरणसंस्था एव पुंसामुपलभ्यन्ते । अतो मलेन सहकारिणा मायोद्भूतगुणोपादाना एव तेऽभ्युपगन्तव्या इति । अथैषां गुणात्मकत्वमेव दर्शयन्ति ।

मदमोहाद्यभिष्वङ्गः परितापश्रमौ च यौ ॥
तामसौ सात्विकश्चैव राजसौ च यथाक्रमम् ।

एवं चान्तःकरणसंस्थानां गुणानां वृत्तयस्त्विमाः न चैतद्व्यतिरिक्ताः काश्चिन्मलस्य वृत्तयो मदादिसंज्ञाः कस्यांचिदवस्थायामात्मनि दृश्यन्ते । ततो न सन्त्येव ता इत्याह—

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

आभ्यो भिन्ना न मूलस्य वृत्तयोऽतो न सन्ति ताः

अतश्च,

त्यक्त्वानिरोधिकाशक्तीर्नान्योधर्मोऽस्यविद्यते
कर्माशयसमेतस्य हेतुत्वं च भवेद्भवे ॥

केवलमलस्य ज्ञानक्रियावारकत्वं कर्मसंस्कारयुक्तस्य संसारहेतुत्वं च युक्तिसिद्धम् । नान्यत्कार्यान्तरमित्यर्थः ।

इत्थं मलस्वरूपमपि प्रदर्श्योपसंहरति—

पशुरित्थं समाख्यातो यत्सम्बन्धादणुः पशुः ।

पशुशब्दो मलवाचकतया श्रीमद्रौरवादौ दृश्यते । तस्य च न तत्वान्तरता । अपि तु पशुतत्व एवान्तर्भावः । तेन विनाऽऽत्मनां पशुत्वाऽयोगात् । तेनानाद्यावृतत्वाच्च किं च विधौ सृष्टिकाले शिवस्य सृष्ट्यादिकरणपूर्वमात्मनां भोगभोजनात्मको मायायाश्च भोगसाधनकलाद्युत्पादनतत्पोषणात्मकः पश्चात्मनां च भोग्यभोगरूपो व्यापारोऽस्मिन् प्रकरणे प्रोक्तः । एते चैषां व्यापारा आत्मावारकमलादेव हेतुभूताद्भवन्ति । मलसद्भाव एवाऽस्य सर्वस्य प्रवृत्तेरिति । अपि च मदादयश्च क्लेशाः पुंसामत्रैव प्रदर्शिता इत्युपसंहरन् अधिकारभेदात्तेषां वृत्तिभेदानाह—

प्रसुप्ता तत्वलीनानांतदरुद्धाश्च योगिनाम् ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

विच्छिन्नोदाररूपाश्च क्लेशा विषयसङ्गिनाम् ।

मायातत्त्वलीनानां प्रलयाकलानामेते क्लेशाः गुणादीनामपि तत्त्वानां तत्रैवोपसंहारात् प्रसुप्ता अकिंचित्करा आसते । योगिनां त्वभिव्यक्ता अपि योगबलान्मध्ये निरुद्धव्यापारा भवन्ति विषयसङ्गिनां तु सकलानां पशूनामुद्भूतविविधस्वव्यापारा भवन्ति । विच्छिन्नोदाररूपा इति पाठे परस्परमुद्भवाभिभवाभ्यां कदाचिद्विच्छिन्नरूपाः कदाचिदुदाररूपाश्च भवन्तीत्यर्थः । इत्थं प्राक्प्रतिज्ञातयोस्ससाधनयोर्भोगमोक्षयोस्ससाधनो भोगस्तावदेताभिः प्रदर्शित इत्यत्रैव भोगप्रकरणोपसंहारः । मोक्षस्तु ससाधनः प्रकरणान्तरे प्रदर्शयिष्यत इति । शुभम् ।

श्रीमत्खेटकनन्दनेन गुरुणा सिद्धान्तसिद्धस्फुटं
संक्षेपादितिकारिकाभिरुदितो भोगः समं साधनैः ।
वाचस्तस्य समीक्ष्य वीततपसा घोरादिना शंभुना
लेशाद्देशिककुञ्जरेण विवृतिस्तासामियं निर्मिता ॥

समाप्तेयं भोगकारिका ॥

इत्यघोरशिवाचार्यविरचिता भोगकारिकावृत्तिः संपूर्णा ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata an

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

Center for Shaiva Studies, Pondicherry Collection

n Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IK

Center for Shaiva Studies, Pondicherry Collection